M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 586

Title: Ashvalyana Sutra Vrittam

386

आश्वलायन सूत्र वृत्तम्

Āshvalāyana Sūtra Vrittam : Title

: Author

: Editor

: Year, Vols.

: Publisher

386 : Remarks

श्रीगणेशायनमः॥ ॥श्रीरामोजयति॥ ॥प्रज्ञानानंदमूर्तिःसकलदृगतिगःसर्वदासन्ननन्यःस
र्वस्मात्स्वप्रकाशःस्थिरचरनिलयःप्रत्यगाभासदेहः।श्रौतस्मार्तक्रियात्माश्रुतिमनननिदिध्यासवैराग्य
लभ्यःसब्रह्माविष्णुरीशःसकलमपिजगत्सर्वदाव्यादशेषान्॥ १॥ग्राह्यव्योपरागनिर्मुक्तंस्वप्रकाशम
नाकुलं।गंभीरंबोधमानंदंनमामिब्रह्मशाश्वतं॥ आश्वलायनसूत्रस्यभाष्यंभगवताकृतं॥देव
स्वामिसमाख्येनविस्तीर्णंसदनाकुलं॥तत्प्रसादान्मयेदानींक्रियतेवृत्तिरीदृशी॥नारायणेनगार्ग्ये
णनरसिंहस्यसूनुना॥ ॥अथैतस्यसमाम्नायस्यविताने योगापत्तिंव्याख्यास्यामः॥ ॥लोकेयानित्र
य्याम्नायंप्रयोगशास्त्राणिप्रसिद्धानितेनान्यनुष्ठानौपयिकतयाध्ययनविध्याक्षिप्तत्वात्समाम्नायमंग
त्वंप्रतिपन्नानि॥तत्रांगांगिनोरनुष्ठानकर्तृमात्रंतर्यमथशब्दोद्योतयति॥ एतस्येतिशब्दोनिर्दिष्टेषु
रौरुकुंताय्यवाजसनेयमहानाम्न्यैतरेयब्राह्मणसहितस्यशाकलस्यबाष्कलस्यवाम्नायद्वयस्यपूर्वदा
श्वलायनसूत्रंनामप्रयोगशास्त्रमित्यत्रप्रसिद्धंसंबंधविशेषंद्योतयति॥ ॥समाम्नायस्येत्यु
च्यते॥एतस्यैवसम्यगभ्यासयुक्तस्येदंशास्त्रंनशिथिलानांसम्यगभ्यासरहितानामिति॥वितता

श्रौ·व·
अग्नयो यस्मिन्निति श्रौतं कर्मजातमग्निहोत्रादि वितानशब्देनोच्यते ।। समाम्नायस्य वितान इति वि
शेषणाच्छ्रौतेष्वेव खिलरहितत्वं गार्ह्येषु सखिलत्वमेवेति ज्ञाप्यते । योगापत्तिः प्रयोगापत्तिः प्रयोग
१ परिणतिः प्रयोगस्वरूपमित्यर्थः । तां वक्ष्याम इति ब्रुवन्निदमेव शास्त्रप्रतिपाद्यमिति दर्शयति । तेन वे
दोगप्रत्ययप्राप्तस्य तत्त्वोपदेशो नियत्वादिकार्यसंबंध एवात्र गृह्णीतव्यो न तत्त्वादेः स्वरूपमिति तस्य
यमेवेति । प्रयोग एव शास्त्रस्य व्यापारो न प्रसंगस्य स्वरूपेपीति । एतदुक्तं भवति । अध्ययनविधितए
वोक्तलक्षणसमाम्नायमधिगम्यानंतरं श्रौतकर्मण्येतत्समाम्नायविहितप्रयोगज्ञानाय इदमपि
शास्त्रमधिगंतव्यमिति । श्रौतेषु कर्मस्वेतत्समाम्नायविहितां प्रयोगापत्तिं वक्ष्याम इत्युक्तं इदा २
नीं तेषामाहिताग्निरधिकारी इत्याह ।। ।। अग्न्याधेयप्रभृतीन्याह वैतानिकानि ।। ।। अग्न्याधेयप्रभृ
तिरादिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि अग्निहोत्रादीनि कर्माण्याधानं कृत्वैव कर्तव्यानी
त्यर्थः । तत्रेहेतुमाह वैतानिकानीति वितानेभवानि वैतानिकानि वितानसंबंधीनीत्यर्थः । वितानशब्दो
स्मिन्सूत्रे भावसाधनोग्नीनां विस्तारवाची पूर्वस्मिंस्त्वधिकरणसाधनोग्निहोत्रादिकर्मवचनः । ए

तदुक्तं भवति । गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि अग्नयश्चाधानसाध्यास्तस्मा
दाधानप्रभृतित्वं सिद्धं श्रौतानां कर्मणां । बहुवचनं सर्वश्रौतकर्मपरिग्रहार्थं । सर्वाण्यपि श्रौतान्या
धानादूर्ध्वमेव कर्तव्यानि न किंचिदपि श्रौतमाधानादर्वागिति । अनेन प्रकारेणाधानस्य कर्मार्थ
त्वनिराकरणेनाग्न्यर्थत्वमर्थात्साधितं भवति । तथा हि यदि कर्मार्थं स्यात्ततिकर्मणि क्रियेत तत्र कस्यचित्
पुरस्तादपरस्य तु यस्य परस्तादाधानं स्यात्तस्याग्न्याधेयप्रभृतित्वं निहन्येत । आधानस्याग्न्यर्थत्वे
चनायं दोषः । अतो बहुवचनेनाधानस्याग्न्यर्थत्वं साधितं भवति । तस्मादनाहिताग्नेः सामवस्था
दयो न भवंति अवकीर्णि पश्वर्थमाधानं न कर्तव्यं भवति । आहृत्यनेन [illegible] विमिदं शास्त्रं श्रुतिमूलमिति
दर्शयति तेनास्मिन् शास्त्रे यदुक्तं तदाम्नायांतरमूलमिति साधितं भवति । अस्मिंश्च शास्त्रे अ
विवक्षितस्य स्वाम्नाये दृश्यमानस्य श्रुतित एव प्रयोगसिद्धिर्भवति । श्रुतेः स्वातंत्र्यसंकीर्तनादिति ।।
आधानस्य प्रथमानुष्ठेयत्वात्प्रथमं तदेव वक्तव्यमित्यत आह ।। ।। दर्शपूर्णमासौ तु पूर्वं व्याख्या
श्रौ·व·
मस्तंत्रस्य तत्राम्नातत्वात् ।। ।। दर्शपूर्णमासशब्दो यथासंख्येन सूर्याचंद्रमसोरत्यंतसंनिकर्षवि

श्रौ· २· प्रकृष्टदेशस्थितिलक्षणवचनो तद्योगादेव कर्मवचनो। अत्र तु कर्मवचनोपक्ष्यास्त्रयोऽभवचनो
पि दर्शशब्दोऽल्पाच्चतरत्वात्तस्य पूर्वनिपातस्ते। तुशब्दो विशेषद्योतकः। तत्र मंगं संहतिः विध्यंतद्व्यर्थः
२ स्वावस्थानादिः संस्थाजपांतः। प्रधानस्यतंत्रणात्तत्राभिरूच्यते। तच्च दर्शपूर्णमासयोरेवाम्नातं
नान्यासिविष्टिषु अतस्तत्सापेक्षत्वादन्यासां तावेव पूर्वमाख्यातव्यौ स्याताम्। एतदुक्तं भवति। आधान
स्य प्रथमप्रयोज्यत्वात्तस्मिन्नेव प्रथममाख्यातव्ये सति तस्याध्यस्य गार्हपत्यादिः पवमानेष्टिर्न सापेक्ष
त्वात्। आपितत्त्रैव वक्तव्यास्युः। उक्ताः अपि विष्ट्यंतसापेक्षत्वात्तस्य च दर्शपूर्णमासयोरेवाम्नातत्वाख्या
स्यानमंतरेण ज्ञानाभावात्तयोरुक्तं नैव शक्यते अतोऽनेन विशेषेण तावेव पूर्वमाख्यास्यामः। नाथा
नमिति सूत्रस्यार्थः। इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभ्यते॥ ॥दर्शपूर्णमासयोर्हविर्धासन्नेषु हो २
तामंत्रितः प्रागुदगाहवनीयाद्देवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद्विहारं प्रपद्यते पूर्वेणोत्क
रमपरेण प्रणीता॥ ॥दर्शपूर्णमासयोरित्यधिकारार्थं। अध्यायपरिसमाप्तेः शेषविशेषास्तंयुक्त
स्योभयार्थत्वाय। हविरासादनमारंभणं यावभ्यं संहतनवैदिकस्य प्रयोगस्य निमित्तं॥ होत्रमित्युक्त

दस्यसमाख्या॥ तद्वेदविहितानां पदार्थानां कर्ता होतेत्युच्यते॥ प्राङ्मुखत्वं त्वा नाचमनाभ्यां संबध्यते। मध्यग
तस्य विशेषाग्रहणात् यज्ञोपवीतं त्वाचमनार्थतया न विधेयं स्मृतिप्राप्तत्वात्। अन्यार्थे वनभवतिसंब
धाभावात्। एकवाक्यगतत्वात् कर्मांगस्य समानस्य प्रयोजनाभावः स्मृतिप्राप्तत्वादेव। अतस्मृतिप्राप्तत्वमि
हानुवदते। स्मार्तानां स्नानाचमनयज्ञोपवीतादीनां श्रौतकर्माविरुद्धानामस्मिन् शास्त्रे प्राप्तिप्रदर्शना
र्थं। इदमाचरेत् कर्मांगं विधीयते। शेषार्थस्य गृहप्रवेशात्। प्रागेव कृतत्वात्। तदुक्तं॥ मनः प्रसादास्त्ये
ष्यात्तपसा स्नानकर्मणा॥ आचांत्याचात्मनः शुद्धिं कृत्वा कर्म समारभेदिति। दक्षिणातेन्नामयोदक्षिणं
पार्श्वमध्यं कृत्वावर्तते स दक्षिणावृत्। विह्रीयंतेऽग्नयो यस्मिन् देशे स विहारः। उत्करो नाम उत्कीर्यंते वेदिपांसवो
यस्मिन्देशे स उत्करः। प्रणीता नाम आपो मंत्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः। उत्करप्रणीताभ्यामंतरेण
योदेशस्तेन विहारं प्रपद्यते॥ एतदुक्तं भवति। स्नात्वाचम्य यज्ञोपवीती भूत्वा हविर्धासन्नेषु आमंत्रितस्स
होता प्रागुदगाहवनीयाद्यो देशस्तस्मिन् प्राङ्मुखोऽवस्थाय निःक्रम्य। प्राङ्मुख एवोत्थाय दक्षिणावृत्ता
पूर्वेणोत्करमपरेण प्रणीतां यो देशस्तेन विहारं प्रपद्यत इति। उत्करप्रणीताग्रहणादेव विहारप्रत्ययेहि

श्रौ॰ र॰ द्वेयद्विहारग्रहणंतत्सर्वः कर्तासर्वकर्मणां विहरणप्रपदनंकुर्वीत। दक्षिणाद्दुत्तरेतेनयथाप्रपद्येतत्थैवनयेत्॥
॥ इध्ममपरेणाप्रणीते ॥ ॥ यदोषधिहविष्कं कर्मतदप्रणीतमिहोच्यते। हविरपर्णार्थत्वात्प्रणीतानां
२ तस्मिन्निध्ममपरेणप्रपद्यते। प्रणीतास्तत्र नसंतीति ॥ ॥ वालालंवालालवस्तु ॥ ॥ वालालानामावटः
पशुसोमादिषुस्त्रियेषुउत्करखेचर्थंमित्रखातात्क्रीयतेतद्धस्तुतेषुतमपरेणप्रपद्यतेसर्वत्रांतरः पश्चिमा
वधिः। एतत्तीर्थमित्याचक्षते ॥ ॥ एतमध्वानंतीर्थमित्याचक्षतेवेदविदः। आचक्षतइतिब्रुवन्वैदिकीयं
संज्ञानपरिभाषाकीर्तिर्दर्शयति। उत्करायमावेपिसंदेशात्तीर्थसंज्ञकएवदेशलक्षणार्थत्वादुत्करादी
नांग्रहणस्येति। अतोग्निहोत्रादिष्वपितेनैवयथाप्रपदनंसिद्धंभवति ॥ ॥ तस्यनित्याः प्राञ्चश्चेष्टाः ॥
षट्सूत्राणिसमर्थीनि। तदर्थंतस्येतिविशेषणंकृतं असत्यस्मिन्होतुः प्रकृतत्वात्तस्यैवमेविधयस्युः २
अस्मिंस्तुसतिसंनिकृतविषयत्वात्सर्वनाम्नस्तीर्थेनविहारप्रपदनार्होयःकर्ताविहितः। तस्यैवेमेविध
योभवंतीतितस्येतिविशेषणंकृतवानाचार्यः। नित्याइत्यनेनप्राकृष्टतायानित्यत्वंनविधातव्यंविहि

शेषणंकृतं। असत्यस्मिन्होतुः प्रकृतत्वात्तस्यैवेमेविधयस्युः अस्मिंस्तुसतिसन्निकृतविषयत्वात्सर्व
नाम्नस्तीर्थेनविहारप्रपदनार्होयः कर्ताविहितः। तस्यैवेमेविधयोभवंतीतितस्येतिविशेषणंकृतवा
नाचार्यः। नित्याइत्यनेनप्राकृष्टतायानित्यत्वंनविधातव्यंविहितत्वादेवस्वरूपनित्यत्वयोरपिसि
द्धत्वात् अतस्तस्यैषोर्थः। तस्यबाह्यानांचेष्टानामुपरमेपिमनोवाक्कायव्यापाराद्योनित्याएवेति। प्रा
चइतिशब्दः पूर्वदिग्वाचीपुंसिबहुवचनांतः चेष्टाइतिक्रियावाचीस्त्रियांबहुवचनांतः तत्रप्राचइ
त्यपुंस्त्वनपुंसः प्राक्तेनसंबंधात्कृतुप्राङ्मुखत्वंविधीयते। चेष्टाशब्दगतबहुवचनेनास्यबहुत्वस्यस
मानाधिकरण्यादेवचेष्टानांप्राक्त्वंविधीयतेतासांअमूर्तत्वात्सतः प्राक्त्वासंभवात्तत्साधनेषु
प्रागग्रतातासांचप्राच्यत्वापवर्गइतिएवंविधिवक्ताज्ञवति। एतदुक्तंभवति। योयस्तीर्थेनविहा
रंप्रपन्नतस्यततआद्विक्रमणान्मनोवाक्कायव्यापाराद्योनित्यास्युः कर्तुश्चप्राङ्मुखत्वंचेष्टानांचप्रा
गपवर्गतातत्साधनानांचप्रागग्रेतिविषमसूत्रप्रणयनेनव्याख्यानतो विशेषप्रतिपत्तिर्नहिसंदे
हस्तलक्षणामित्येषापरिभाषासंगृहीताभवति। अंकधारणाच्च। अंकमूरुरुपस्थस्तस्यकरणंद
क्षिणोत्तरेणोपस्थेनेतिवक्ष्यमाणरूपधारणेप्युच्यतेसाचनित्या। भवेदुपवेशनकालादारभ्य

श्रौ॰ द कर्मपरिसमाप्तेरविच्छेदेनकार्यमित्यर्थः॥अंकधारणस्योपवेशनांगत्वेनप्राप्तस्यादृष्टार्थतापरिहारायेव
नित्यत्वेप्राप्तेतन्नित्यतावचनंनपत्नीसंयाजिके॥निरस्यत्तृणमित्येवमादिषूपवेशनेषुमंत्रनिषेधेपि
५ वक्ष्यमाणस्योपवेशनप्रकारस्यनित्यत्वेनप्रापणार्थंमंत्रविध्यसंबंधेष्वप्यग्निहोत्रादिषुवक्ष्यमा
णलक्षणस्यैवोपवेशनस्यप्रापणार्थंच।यज्ञोपवीतशौचेच॥पूर्वस्ययज्ञोपवीतग्रहणस्यस्मार्तानां
प्रापणार्थत्वान्निवीतप्राचीनावीतयोर्मानुषपैतृकयोःकर्मणोःस्मार्तत्वेनप्राप्तौसत्यांनियमार्थमिदमु
च्यते।यत्रनिवीतप्राचीनावीतेविधीयेतेतत्रैवतेभवतोनमानुषपैतृकेवाकर्मणिइतितयोर्विध्यभावे
यज्ञोपवीतमेवेतिनियम्यते।देशस्यांगप्रधानार्थत्वाद्दीक्षादिभक्षणादेश्चांगत्वादस्यचविहारदे
शौचप्राप्तौसत्यामेवंशौचग्रहणेननियम्यते।कृत्स्नमप्यशुचित्वसंपादितंयत्तद्विहारान्निष्क्रम्यबहिः
कर्तव्यंअंतर्विहारेशुचिरेवनित्यंस्यादिति।विहाराद्व्यावृत्तिश्चेत्तत्रचेत्कर्म।व्यावृत्तिःपृष्ठतःकृतिः ४
नविहारंपृष्ठतःकुर्यात्तत्रचेद्विहारेकर्मकुर्वन्भवेत्प्रयोगमध्येपिकर्मकुर्वतामेवायंनियमोनोपर
तकर्मणामित्यर्थः।अतोविहारव्यावृत्तिनिषेधात्पश्चादुल्लोपवि~~शति~~प्रयश्यपश्चात्तस्यधिष्ण्य ५
स्योपविशति।पश्चादुत्तरवेदेरुपविश्याध्वर्युरित्येवमादौमध्येरथायाअपक्रम्यउत्तरतउप
विशेत्।चशब्दस्त्रिसूत्रेषुनित्यत्वानुकर्षणार्थः।तत्रचेत्कर्मेतिवचनाद्ब्राह्मणोप्ययंनियमोभवेत्॥

उत्तरस्यांगत्वेदृष्टपदत्रयंतेनब्रह्मणोदक्षिणांगव्यापारःसिद्धोभवति।एकांगवचनेदक्षिणंप्रती
यात्॥एकशब्दःकैवल्यवचनःएकंचतदंगंचेत्येकांगंसव्यदक्षिणभेदेनद्वित्वयोगियदंगंहस्तादितस्य
द्वित्वेनविनावचनेदक्षिणमेवांगंसाधनंविद्यात्।द्वित्वयोगेद्वाभ्यांकुर्यात्।एकवचनबहुवचनेकर्तृ
कबहुत्वापेक्षेएकत्वादीनामन्यत्रोपयोगात्केवलांगवचनमेवदक्षिणप्रत्ययस्यनिमित्तमित्यर्थः
हस्तेनवापादेनवेत्युदाहरणं॥अनादेशे॥द्वित्वयोगिनोंगस्यानादेशेक्रियामात्रविधानइत्यर्थः।
तत्रापिदक्षिणंविद्यात्प्रपद्यतेअभिक्रम्यअंगुलीरंगुलिभिरित्युदाहरणात्चक्षुरादेरनंगत्वा
त्तेष्वयंनियमोनास्तिअवयवविशेषाश्रयाहिशक्तयश्चक्षुरादयउच्यंतेनावयवाइति॥कर्मचोद
नायांहोतारं॥कर्तृरहितेक्रियाविधौहोतारंविद्यात्कर्तृसहितेसएवकर्ताभवेत्येनसहितंतत्क
र्मस्यात्।कर्तृरहितोपिगुणविधिःसर्वार्थएवकर्मचोदनायामितिविशेषणात्।नेदंहोतुःप्रापकं
तर्हिप्राप्तस्यनियामकंतेनेष्टिपशुसोमेष्वन्यत्रनहोतुरेवकर्तृत्वनियमइति॥ददातीतियजमानं॥
स्वत्वेव्यावृत्तिपूर्वकंपरस्वत्वापादनपर्यंतेददातिविधौयजमानंकर्तारंविद्यात्।जुहोतिजपतीति
प्रायश्चित्तेब्रह्माणं॥तृतीयाध्यायगोचरप्रायश्चित्तप्रकरणेजुहोतिजपतिकर्तारंब्रह्माणंवि
द्यात्।जपशब्देनात्रसाहचर्याज्जुहोत्यादिषड्कंगृह्यतेतस्मिन्प्रकरणेमुख्यजपस्याभावात्॥ए

श्रौ·इ· ५

वंचसातिकर्मकरणत्वेनहोममंत्रस्यापिग्रहणेसिद्धेयज्जुहोतिग्रहणंतज्जपग्रहणेनहोममंत्रान
ग्रह्यंतइत्येवमर्थंतेनपित्र्यानोजपादिलोपेपिहोममंत्रानलुप्यंते।ऋचंपादग्रहणे।।पादशब्दो
त्रमूकवाचीऋचः।सूक्तग्रहणेऋचंविद्याद्वनात्रमध्ययोर्ग्रहणं।।प्रवोवाजाअभिद्यवइत्युदा
हरणं।सूक्तंसूक्तादौहीनेपादे।अत्रपादशब्दोगायत्र्यादीनांभागवाचीसूक्तादौहीनेपादेग्रह्यमा
णेसूक्तंविद्यात्।त्वमग्नेवसूंस्त्वंहिक्षैतवदित्याद्युदाहरणानि।।अधिकेतृचंसर्वत्र।।अर्धर्चेपा
देग्रह्यमाणेतृचंविद्यात्तृचंविद्यात्सर्वत्रसूक्तादावसूक्तादौचेत्यर्थः।अग्नआयाहिवीतयइत्या
नईळेन्योनमस्यस्तिरइत्याद्युदाहरणानि।जपानुमंत्रणाप्यायनोपस्थानान्युपांशु।।सर्वत्रशा
स्त्रेपिसंबध्यतेमध्यमध्यगतस्यविशेषाग्रहणात्।प्रयोजनवत्वाच्च।अस्मिन्शास्त्रेयानिजपा
दीनितान्युपांशुप्रयोक्तव्यानि।।मंत्राश्चकर्मकरणाः।।चशब्देनात्रसर्वत्रोपांश्विति चानुकृ
ष्यते।मंत्राःकर्मकरणाश्चसर्वत्रोपांशुप्रयोक्तव्याः।उपांशुत्वस्यैदंलक्षणंकरणवदशब्दम ५
मनःप्रयोगउपांश्विति।।जपादीनांपृथग्लक्षणमुच्यते।जपमुच्चारणंविद्यात्कृतार्थमपित
द्भवेत्।अर्थतःकार्यलाभश्चेदर्थएककृतोभवेत्।मंत्रमुच्चारयन्नेवमंत्रार्थंतेनसंस्मरेत्।।वीक्षणं ६
तन्मनाभूत्वास्यादेतदनुमंत्रणं।एतदेवाभिमंत्रस्यलक्षणंवीक्षणाधिकं।अद्भिःसंस्पर्शनाधि
क्यात्तदेवाप्यायनंस्मृतं।उपस्थानंतदेवस्यात्जपातिस्थानसंयुतं।बाधकापनदतेषुमंत्रकाले

श्रौ·इ·

क्रियेततत्।कर्मणःकरणास्तेस्युर्विहितार्थप्रकाशनंमंत्रेणकृत्वामंत्रांतेक्रियतेकर्मयेषुतु।इदंका
र्यमनेनेतिनकश्चिद्दृश्यतेविधिः।लिंगाद्वेदमर्थंतंयेषांतेमंत्रसंज्ञिताः।अनुमंत्रणग्रहणेनाभि
मंत्रणमपिगृह्यते।अनुमंत्रणाप्यायनोपस्थानानांकर्मकरणत्वाविशेषेपियत्पृथग्ग्रहणंतन्मं
त्रांतेकर्मारंभइतिकर्मकरणधर्मोयःसतेषुनभवतीत्येवमर्थं।तेनमंत्रोच्चारणसमकालमेवतेषुक्रि
याभवति।प्रसंगादपवादोबलीयान्।सामान्यविधेर्विशेषविधिर्बलीयानित्यर्थः।लोकेवेदप्रसि
द्धस्यन्यायस्यवचनंप्रयोजनंसर्वेपवादाःप्रसंगस्यैवबाधकानामपवादाःस्वबाधकाद्बलेपरस्य
रंबाधकाइत्येवमर्थं।अतःस्वाद्वीकिलीयासुआहावोत्तरयोःप्रणवयोर्यौमध्येप्रतिगरौतयोः
प्रणवरूपःप्रतिगरोनबाधकोभवति।प्रपथाभिहततरेणपादेनवेदिंश्रोण्यान्तरयापास्य
समानिधायप्रपदेनबहिःराकन्यसंहितापाणीधारयन्नाकाशस्थांगुलीहृदयसंमितावंकसं
मितौवाबाहूपृथिव्योःसंधिमीक्षमाणस्तिष्ठेदितिशेषः।तीर्थेनविहारंप्रपद्यतइत्यु०तेन
रूढनपदविक्षेपेणबहिर्विहारंतंविहारप्रपदनंकर्तुमशक्तोदक्षिणांगत्रेस्यपश्चात्सिद्धएव।इदं
नीप्रपदमुच्यतेआवेदिश्रोण्याःप्रपदनंतस्यसर्वस्यविहितत्वसिध्यर्थं।अभिहततरेणानि
तरयोवचनंअनेकपदविक्षेपसाध्यत्वादस्यप्रपदनस्यसर्वेषुचपदविक्षेपेषुदक्षिणस्याग्रताहरण

श्रौ॰ वृ॰ सिध्यर्थं वेदेरपरार्ध्यो ॥ श्रोणिरिति संज्ञा ॥ पूर्वार्ध्योरंसइति पादस्यापरो भागः पार्ष्णिः पूर्वं प्रपदः
॥ बहिर्वेद्यास्तीर्णं तृणं ॥ उत्तरया श्रोण्या दक्षिणस्य पादस्य पार्ष्णिं समं निधाय तस्यैव प्रपदं मध्ये वेद्यां
स्तीर्णं बहिरा क्रम्य बहिर्वेदि सव्यं निधायात्मनः सव्यदक्षिणौ हस्तौ पृथक्पृथक् विरकांपुकी को
कृत्वा पुनस्तथाभूतौ तिर्यक्तौ पाणी परस्परसंहितौ वक्त्वा तौ हृदयसमितौ यंकसंमितौ वा धारस
नूघानाटथिवा ॥ संधिमीक्षमाणः नोर्ध्वम प्रतीर्यगवेक्षमाण ऊर्ध्वः प्राङ्मुखस्तिष्ठन् ॥ ९ तं होतु
स्थानं ॥ अयं स्थानशब्दो भावसाधनो नाधिकरणसाधन एतदुक्तं भवति श्रोणिदेशेन हस्तपादादिद्वि
त्रणे न च विशिष्टं यत्पूर्वसूत्रोक्तं तत्र स्थानशब्देनोच्यत इति प्रदर्शयते ॥ यत्र होतुः स्थानं चोद्यते
तेनैव स्थानं भवतीत्यर्थः ॥ होतृग्रहणमुत्तरसूत्रस्य सर्वार्थत्वाय ॥ आसनं वा सर्वत्रैवंभूतः ॥ अथवा
राहस्त्रैराहस्यार्थं वर्तते स्थानं चासनं च सर्वत्र सर्वः कर्ता एवंभूतः कुर्यात् पूर्वोक्तहस्तपादादिद्वियंत्रणा
विशिष्टेन श्रोणिदेशाविशिष्ट इत्यर्थः ॥ श्रोण्यादिषु सर्वेषु प्राप्तेषु श्रोणिदेशवर्जनेन कर्तृशरीर
विशेषणानामेव प्रापणार्थमेवंभूतवचनं ॥ वचनादन्यत् ॥ उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं
तावन्मात्रस्यैव न तत्संबंधिनोन्यस्यापीति ॥ तेन होमादौ क्रियमाणे दक्षिणस्य पाणेरपरत्वे पिस ८

श्रौ. ८

संहत्या त्रापेतीतिसिद्धं ॥ प्रेषितो जपति ॥ अत्रान्यार्थस्य प्रैषस्याभाव ॥ सामिधेन्यर्थं प्रेषितो होता ॥ ३ ॥
नमः प्रवक्त्रे नम उपद्रष्ट्रे नमो नुख्यात्र एकइदमनुवक्ष्यति सइदमनुवक्ष्यतियण्माविरहसस्यानुख्याश्च इ
नमः प्रवक्त्रेत्येतद्यपाश्वीपध्यश्वाक्तमस्कितयन्नः स्याधुलुंदा सिप्रपद्येहमेवमानमुमितिस्वना
थिवी चाह अरात्रिश्चापश्चौषधयश्चवाक्त्वमस्कितयन्नः साधुलुंदा सिप्रपद्येहमेवमाममुमितिस्वना
मादि हृतंभूतं भविष्यति जातं जनिष्यमाणं आभजाम्यथावं वाचा अशांतिं वहेद्गुल्यग्राण्यवरुप्य
जातवेदो रमयापश्चून्मयीति प्रतिसंदध्याद्धर्ममे द्यावापृथिवीवर्माग्निर्वर्मसूर्यो वर्ममे संतु निरश्वि
काः ॥ तदध्वानः प्रथमं मनसीयेति । नमः प्रवक्त्र इत्यादि हो त्वं जुषध्वमित्येतं जपेत् ॥ सामिधेन्यर्थ
प्रेषोत्तरकालवर्तित्वादयं जपः सामिधेन्यंगं भवति । अत्र जपममुमिति शब्दस्थाने द्वितीयया विभक्त्यास्व
नामनामनिर्दिशेत् ॥ स्वग्रहणात्यातिमिषित्वेनिप्रवृत्तस्यापि जपकर्तुरेव नामानिर्देश्यं न होतुरि
तिलभ्यते । अशांतिं वहेति जपकरे शमुच्चारयन्नंगुल्यग्राण्यवकर्षेत् । मयीमिचोच्चारयन्प्रतिसंद
ध्यात् । तेनावकर्षसंधाने जपांगं तत्कुर्वतो विधानात् । समाप्य सामिधेनीरन्वाह ॥ समाप्येत्यनेन नमः
प्रवक्त्र इत्यादि हो त्वं जुषध्वमित्यंतस्यैक जपत्वं दर्शयति । तेनांतरायत्कार्यद्वयमवकर्षणं संधानं च तत् ॐ
पकर्तुः संस्कार एव भवति । भकार्यांतरं ॥ अतः पित्र्यायां जपलोपेन कर्तव्यं भवति । अग्नेः समिध
नार्थान्यत्वः सामिधेन्यः ॥ ता अन्वाह अनुब्रूयादित्यर्थः ॥ हिं इति हिंकृत्य भूर्भुवः स्वरोमिति जप
ति ॥ हिंकारस्य नामारूपत्वादिष्टपरिग्रहार्थः पाठः ॥ एषोमिहिंकारः ॥ जपसाहितस्य हिंकारस्याभि ८

हिंकारइतिसंज्ञाविधीयते।भूर्भुवस्स्वरितिचजपित्वाकोऽहिंकरोति॥एवेतस्यधारणंनकेवलंयु
क्त्ममात्रंप्रणवरहितत्वंचेतिदर्शयति॥आचार्यग्रहणंविकल्पार्थं।नचपूर्वंजपंजपति।को
१० ऽहइतिशेषः।पूर्वमितिनमःप्रवक्त्रइत्यादिरित्यर्थः॥अथसामिधेन्यःप्रवोवाजाअभिद्यवोअग्न
आयाहिवीतयेऽगणानईळेन्योनमस्यास्तिरोतिंइत्वत्वणीमहेसमिध्यमानोअध्वरेसमिद्धोअग्न
आहुतेतिद्वे।अथचाद्दऋचामेवसामिधेनित्वंदर्शयतिपूर्वंसामिधेनीग्रहणात्सामिधे।न्याद्यंगा
नामध्येभिहिंकारःसामिधेन्यादीनामासन्नतरमंगमितिदर्शयति।तेनवैश्वदेवेशस्त्रेदिग्ध्या
नोत्तरकालमभिहिंकारःकर्तव्यइतिगम्यते॥ताएकश्रुतिसंततमनुब्रूयात्।याएताउक्ताऋ
चस्ताएवमनुब्रूयादित्यर्थः॥उदात्तानुदात्तःस्वरितानांपरःसंनिकर्षएकश्रुतं॥एकश्रुत्यलक्ष
णमुच्यते।उदात्तोनुदात्तःस्वरितानाममभिव्यंजकायेप्रयत्नाआयामविस्रंभाक्षेपास्तेषा
मन्यतमस्यैकस्यैवान्यतःसन्निकर्षणासजातीयप्रयत्नाव्यवधानेनयदुच्चारणंतदेकश्रुत्यमि
त्यर्थः॥स्वरादिप्रगंतमोंकारंत्रिमात्रंमकारांतंकृत्वोत्तरस्याअर्धर्चेवस्येत्संततं॥इदंसंतत
लक्षणंस्वराद्युगंतया।इत्येतच्चिह्नहेतोपलक्षणार्थत्वादुगंतोयःस्वरादिःस्वरएववाकेवलस्तमो १०
कारंत्रिमात्रंकृत्वातेनप्रणवेनोत्तरामृचंसंधायतस्याअर्धर्चेवस्येत्।मकारंत्रिमात्रमितियु

क्रमेणायोजना।समुदायस्य त्रिमात्रतायाइष्टत्वात् अत एवं भवति ॐकारोर्धतृतीयमात्रः
मकारोर्धमात्रइति त्रिमात्रत्वं प्रणवस्य।उत्तरवचनमाह त्रितोनाहतित श्रोभयथाप्रस्ततेपत्न
त्वेनोत्तरासंधानमात्रं विधीयतेततसंततमित्युच्यते।एतदवसानं।सामिधेनीष्वनूच्यानां
मृचामर्धर्चेवसानस्यपूर्वसूत्रेणैवासिद्धत्वादिदमवसानविधानमाद्यायामृचिप्रापणार्थं।
अन्यत्रचजपादिष्विति।उत्तरादानमविप्रमोहं।आदानमारंभः विप्रमोहो विशेषः पूर्वस्याऋ
सस्याविप्रमोहत्वोत्तरस्याआसमारभतेत्यर्थः।विप्रमोहपूर्वमेवसम्यग्ब्रूयादित्यर्थः।अस्मि
न्नेवपदद्मेवप्रायश्चित्तंनान्यदितितत्रस्यप्रयोजनं।अमात्रोप्रणवेनावसानं।अर्धमात्रस्यवि
धानंविहितएवायमर्धमात्रार्थमात्रइत्येवमर्थं।चतुर्मात्रोवसाने।यदवसानंविहितमेतना
र्धमात्रंतस्मिन्नवसानेचतुर्मात्रःप्रणवेनात्रिमात्रः।तस्यांतापत्तिः।तस्यप्रणवस्यांतोम
कारस्तस्यवर्णांतरापत्तिर्वक्ष्यतइत्यर्थः।स्पर्शेषुस्ववर्ग्यमुत्तमं।स्पर्शेषुपरेषुयस्स्पर्शोमका
रास्तरः तस्यस्ववर्ग्यउत्तममापद्यतेमकारः।समिध्यमानोत्तमभर्जयंतेसादिनिदर्शनं।अंत ११

स्थानुस्तांतामनुनासिकां रेफस्यानुनासिकत्वासंभवात् एवांत्रांतस्थाप्रद्यंते।।
तासुयायापरांतःस्थास्तांतामनुनासिकांमकारआपद्यते तत्रसानुनासिकाः पूर्वोउ
दाहृताएव।अतःसंयोगः।विद्धानिप्रचोदयोर्वाजीवोजेष्विति निदर्शनं।। ।।रेफो
ष्मस्वनुस्वारं।। ।।एतेषुमकारोनुस्वारमापद्यते।अनुस्वारोनामनासिकास्थानो
त्सृष्टकरणश्च।।अस्त्यर्यज्ञस्यसुक्रतोंसमिध्यमानोअध्वरइत्यादि।। ।।त्रिः
प्रथमोत्तमे अन्वाहाध्यर्धकारं।। ।।अध्यर्धकारमध्यर्धप्रभृत्येत्यर्थः।प्र
थमोत्तमेत्रिरध्यर्धकारंब्रूयात्।। ।।अध्यर्धामुक्त्वावस्येदथर्चे।। ।।प्र
थमायामेवमध्यर्धकारंभवतिपूर्वामध्यर्धामुक्त्वावसायततोर्धर्चेब्रूयात्।।इदानीं
वचनमध्यर्धचतुष्काभिप्रायंपूर्वस्मिन्सूत्रेप्रथमायामारभ्योर्धर्चोद्वितीयाया
मेकश्चेतित्र्योर्धर्चाउत्तमायामिंसद्द्वासेद्वितीयततीययोरार्धर्चायोर्धर्चाउ
त्तमस्यात्रचएकोर्धर्चइत्येवंचत्वारोर्धर्चाविवक्षिताइत्याद्भवेयुः।अध्यर्धकारविधेः

उत्तरभासंधानविरोधादिति।अथशब्दोऽस्यस्तत्रस्यान्यथार्थत्वंप्रतिभासनिवृत्त्यर्थः॥
द्वेत्र्यमनुत्तमस्यानथाऽध्यर्धा॥ ॥पूर्वेणसंधानाविरोधाच्छिन्नेद्रुत्तमायामेवनवति॥
अथशब्दश्चपूर्ववत्॥ ॥ताःपंचदशाभ्यस्ताभिः॥ ॥एकादशानामन्त्यामाद्यंतयोः
त्रिरभ्यासेकृतेताअभ्यस्ताभिःसहपंचदशैवभवंतीत्यर्थः।प्राप्तएवायमर्थः।अत्रवचन
नस्येदंप्रयोजनंसर्वत्राभ्यस्ताभिःसहविहितसंख्यापूरणंकर्तव्यमिति॥ ॥एतेनश
स्त्रयाज्यानिगदानुवचनाभिष्टवनसंस्तवनानि॥ ॥शंसत्यादिशब्दचोदितानिश
स्त्रादीनिभवंति॥एतेनेतिसामिधेन्यनुवचनमुच्यते।शस्त्रादीनिचतत्रतत्रविहितानि
तेषांधर्मापेक्षास्ति।तत्रैतेनतानीत्युक्तेऽनन्तरोक्तानितानीतिगम्यतेअनेनप्रकारेणते
षांसामिधेनीतिधर्मातिदेशउक्तोभवति।सर्वधर्मप्राप्तौकतिपयधर्मनिषेधार्थमाह।
॥ ॥नत्वत्राध्यर्धकारं॥ ॥नजपःप्रागभिहिंकारात्॥नाभिहिंकाराभ्यासावब

ऊर्ध्वप्रकृत्या॥ ॥अन्यत्रैषैतावदनुवर्तते।तस्यसामिधेनीभ्योऽन्यत्रेत्ययमर्थः।अतःपि
त्र्यायामभिहिंकारःसिद्धोभवति।अभ्यासनिवृत्त्यर्थंतत्रैवताग्रहणंकरिष्यइति।तेना
भ्यासोनभवति।प्रकृत्येतिशब्दोऽभ्यासेनबह्वृचपिपुरीष्यासोअयमग्नइत्येवमादिषुत
योरभावंदर्शयति॥ ॥नावच्छेदादौ॥ ॥अवच्छेदानामयत्रऋक्त्रादिषुमध्येसमाप्या
वस्येदितिएवमादिभिःशब्दैरवसानंविहितंसमाप्यप्रणवेनेत्येवमादिषुसोवच्छेदः।त
त्रापितोनस्तः॥ ॥शस्त्रेष्वेवहोत्रकाणामभिहिंकारः॥ ॥अस्मिन्शास्त्रेमुख्य
वर्जिताद्वादशर्त्विजोहोत्रकाइत्युच्यंते।नसप्तवात्रयोवा।तेनग्रावस्तुतोऽभिहिंकारान
भावःसिद्धोभवति॥ ॥सामिधेनीनामुत्तमेनप्रणवेनाग्नेमहाँ३असिब्राह्मणभार
तेतिनिगदेवसाय॥ २॥यजमानस्यार्षेयान्प्रवृणीतेयावन्तस्युः॥ ॥प्रणवेननि
गदंसंधायनिगदेवस्येदित्यर्थः।तत्रावसायार्षेयान्प्रवृणीतेयावंतोयजमानस्यतेभवंति।
तेचप्रवराध्यायेव्याख्याताः॥ ॥परंपरंप्रथमं॥ ॥अस्येमआर्षेयाइत्यंतःअयंपरअयमपर

श्रौ· १२ त्येवमादिसूत्रस्यानुसारेणप्रवराम्नायएववरणप्रकारः पाठितः सएवइदानीमियंतोवारि
तव्याइत्युच्चारितव्याइतिविधानमन्यक्षेत्रजातत्वामुष्यायणार्थं ॥ ॥पौरोहित्यान्राज
१२ विशां ॥ ॥पुरोहितस्ययआर्षेयास्तानेवराजन्यवैश्ययोःप्रवृणीतेबहुवचनंत्रैवर्णि
कस्त्रीजातानामनुलोमानांसंग्रहार्थं ॥ ॥राजर्षयन्वाराज्ञां ॥ ॥मानवैलपौरूरव
सेत्येवं पौरोहित्याच ॥ ॥सर्वेषांमानवेतिसंशय ॥ ॥अज्ञानेसंशयेवत्रयाणांव
र्णानांमानवेत्ययंशब्दः प्रवरोभवेत् ॥ ॥देवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितः कवि
शस्तोब्रह्मसंशितोघृताहवनः प्रणीर्यज्ञानांरथीरध्वराणामतूर्तोहोतातूर्णिर्हव्य १३
वाळिन्यवसायास्पात्रंजुहूर्देवानांचमसोदेवपानोअराइवाग्नेनेमिर्देवांस्त्वंपरिभूरस्या
वहदेवान्यजमानायेतिप्रतिपद्यदेवताद्वितीययाविभक्त्यादेशमादेशमावहेत्यावा
हयत्यादिरूपावयन् ॥ ॥निगदव्यवसायेतिनिगदइतिसप्तमीनिर्देशात्पूर्वापरीभूतोनिग
दोनपरिसमाप्तइतिगम्यते। अतः प्रवरोपितस्यैवशेषः। क्वचिन्मंत्राम्नायेभारतशब्दा

नंतरमसावितिप्रवरप्रकृतेः। पठितत्वाच्चसंबुद्धिसामानाधिकरण्याच्च। देवेद्धइतिनिविन्नय
दनिगदः। चतुर्दशानिविद्। पदानिपरिभूरसीत्येवमंतानि। आवहदेवान्यजमानायेत्यादिसु
यजायजेत्यंतआवाहननिगदः। सामिधेन्यादयएतेमंत्रा आहवनीयाभिध्यायिनः। तत्रभारते
त्यवसेत्। प्रवरांतेच। निविन्नदानामेकादशेच। चतुर्दशेनावाहननिगदंसंधाययजमानाये
त्यवस्येत्। प्रतिपद्यावसायेत्यध्याहारात्। प्रतिपद्येतिवचनमस्यवाक्यस्यप्रतिपत्तिसंज्ञाक
रणार्थं। तेनापिच्छायांप्रतिपदंतरविधानएतन्नभवति। तत्रस्थित्वादेवतावक्ष्यमाणाद्वि
तीययाविभक्त्यादिश्य। दिश्यानंतरमावहेत्यावाहयति। आवहशब्दस्यादिरूपावयन्। द्वितीया
विधानंभवति। विभक्त्यंतरविधानेतुतद्देवभवति। आवहदेवान्होत्रायावहावहजातवेदः
सेतेषुत्रिषुप्लुताचसानेनक्तः ॥ ॥अग्नआवहेतितुप्रथमदेवतां ॥ ॥प्रथमदेवतायामयं
विशेषः ॥ तुशब्देनयष्टव्यदेवतावाहनशब्दयोर्मध्येऽग्नेशब्दंब्रूयात् ॥ ॥अग्निंसोममि
त्याज्यभागौ। यागयोरियमाख्यातसंबंधाद्देवतयोरपीति ॥ ॥अग्निमग्नीषोमा

१४ वितिपौर्णमास्यां॥ ॥विशेषाभावात्सोमयाजिनोसोमयाजिनश्चप्रधानदेवतेएते॥ ॥अ
ग्नीषोमयोस्थानइंद्राग्नीअमावास्यामसंनयतः॥ ॥पौर्णमास्याःप्रथमाम्नानात्सैवप्रथमं
प्रयोज्या।स्थानशब्दःपौर्णमास्याधर्माणांप्रथमसंबंधंदर्शयति।प्राप्तावविशेषेपिप्रयोगा
वस्थायांविशेषग्रहणादिति।तेनेदंबोधितंभवति।असमाम्नातानामसतिलिंगविशेषेपौर्ण
मासमेवतंत्रमिति।दधिपयोभ्यांयागंकुर्वन्संनयन्नित्युच्यते।योनसंनयतितस्येंद्राग्नीद्विती
या॥ ॥इंद्रंमहेंद्रंवासंनयतः॥ ॥संनयतोमावास्यायामिंद्रंमहेंद्रंवाअग्नीषोमयोस्था
नेआवाहयेत्॥ ॥अंतरेणहविषीविष्णुमुपांश्वैतरेयिणः॥ ॥ऐतरेयिणःशाखाविशेषा
ध्यायिनस्तएवमुपांशुयागमुभयोरपिपर्वणोरंतरेणहविषीइच्छंति॥ ॥अग्नीषोमीयं
पौर्णमास्यांवैकल्पममावास्यायामेकेनैकेकंचन॥उभयोरपिपर्वणोःकुर्वन्तोपांशुयाज १४
मेकेनेच्छंति॥ ३॥ अन्येषामप्युपांशूनामावहस्वाहायाढूप्रियाधामानीदंहविरितिहोत्रा
यइत्यत्रैः॥ ॥अन्येषामपीतिपित्र्यादीनामंगोपांशूनांसंग्रहार्थमावाहनादिषुवचनु

षुनिगदेषुयान्युपांशुयाजसंबंधीनिषट्पदान्यावाहनादीनितेषामुच्चैरितिसंज्ञाविधीयते।तंत्रस्वरा
ण्युपांशोरुक्तानीत्यनेनसर्वेषामुच्चसंज्ञानांतत्रस्वरोविधीयते॥ ॥येन्येतद्द× मात्रं× वनाःपरोक्षा
त्तानुपांशूच्चैर्वा॥ ॥येषांपदांतरसंनिधानादेवविशेषतनिश्चितावसीयतेतेस्वतः॥अनुव्रतादयः
क्रियावचनाद्यर्थः।तेषामुपांशुत्वंप्राप्तमनूद्यउच्चैःसंज्ञाविकल्पेनविधीयते॥ ॥प्रत्यक्षमुपां
शु॥ ॥यागंप्रतिचोदितदेवतानामधेयंप्रत्यक्षमित्युच्यते।तस्यप्राप्तमुपांशुत्वंनियमार्थंविधी
यतेतस्यचोपांशुत्वंभवेत्।उपांशुदेवतायाःप्राधान्येपिप्रथमदेवतायाःसंबंधिनोग्निशब्दआवा
हनस्विष्टकृन्निगदयोर्नतस्यापीति।अत्रकिंचिदुच्यते।उपांशुयष्टव्यमितिवचनादुपांशुत्वंयाग
धर्मतयावगम्यमानंतत्रासंभवादानर्थक्यतदंगन्यायेनतत्संबंधिनःशब्दान्परिगृह्णातिअतित
त्रावहादिनामागुवादीनांचहोतायक्षदित्यस्यचोपांशुनियमादन्यस्यसर्वस्यतंत्रस्वरप्राप्तियाज्या
नुवाक्ययोरागूर्यादिभिःप्राणसंतानविधानादुपां× त्व× शुत्वमेववस्थितं॥ ॥प्रतिचोदनमावाह
नं॥ ॥चोदनांचोदनांप्रतिप्रतिचोदनं॥चोदनादेवताचोदनां॥यावत्योदेवताश्चोदितास्तावंत्या

वाहनान्निभिन्नानीत्यर्थः॥ प्रत्यावाहनमुच्छ्वासनिश्वासासिध्यर्थंभेदसाधनं॥ ॥सर्वाआदिश्यसकृ
देकप्रदानाः॥ ॥यत्रबहुभिर्हविर्भिरेकयायाज्यया बह्वीभ्योदेवताभ्योयुगपद्यागः क्रियतेतएकप्रदा
नायागाः तत्संबंधादेवताअप्येकप्रदानाइत्युच्यते। सर्वाइतिवचनंसर्वासांप्रथमादेशार्थं॥ ॥त
थोत्तरेषुनिगमेष्वेकामिवसंसक्तयात्॥ ॥एकामिवेतिवचनं × आदिश्य वचनंसर्वाआदिश्यां
तेआवाहशब्दप्रयोगार्थंसकृद्वचनमंतेपिसकृदेववक्तव्योनप्रावद्देवतमित्येवमर्थं × यथैक
स्यादेवतायाः पुरस्तात्स्वाहायाढूशब्दोअनुषतादयश्चैकवचनेनतथैतास्वपीति॥ ॥समानां
देवतांसमानार्थां॥ ॥निगमेष्वेकामिवसंसक्तयादित्यत्रापिसंबध्यतेविशेषाग्रहणात्। प्रयोजन
वत्वात्संप्रदायाश्च। समानामित्येकशब्दामित्यर्थः। समानार्थामित्येकप्रयोजनामित्यर्थः॥ ॥अव्य
वहितांसकृन्निगमेषु॥ ॥अव्यवहितांअन्ययादेवतयानिगमेषुसकृद्ब्रूयात्। एकवचनेनैव॥ ॥जो
व्हास्वा॥ वापिकासुदेवांआज्यपांआवहाग्निंहोत्रायावहस्वंमहिमानमावहावहजातवेदःसुयजाय
जेत्यावाह्ययथास्थितमूर्ध्वजानुरूपविश्योदङ्वेदेर्युस्तरणानिमित्तोप्रादेशंकुर्यात्॥ अदितिर्मा

तास्यांतरिक्षान्मात्छेत्सीरिदमहमग्निनादेवेनदेवतयात्रिवृतास्तोमेनरथंतरेणसाम्नागायत्रेण
छंदसाग्निष्टोमेनयज्ञेनवषट्कारेणवज्रेणयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मीति॥ ॥आवापि
का आवापेद्धार्योग्याः प्रधानदेवताइत्यर्थः॥ ताःसुकृतावाहनासुदेवानाज्यपानावाहयेत्। स्वि
ष्टकृतंच। पाठोनुनासिकालाभायनकारलोपायच। होत्रायावहशब्दयोः स्विष्टकृदावाहनप्रयोगाय
च। किंच। पठितावाहनानांपाठादेवोत्तरेष्वपिनिगमेषुनिगमनसिद्धिनलक्षणातइत्येवमर्थं। आज्य
पाःप्रयाजानुयाजदेवताः। अग्निंहोत्रायावहस्वंमहिमानदेवहेत्येतावान्स्विष्टकृदावाहनार्थः। आ
वहजातवेदःस्यादिसुयजायजइत्यंतोनिगदशेषः। आवाह्यवचनंसुयजायजांतस्यआवाहननिग
दत्वायसामिप्रेत्यर्थंयथास्थितस्तथोर्ध्वजानुरूपविश्यउदङ्वेदेर्युस्तवेद्यांस्तीर्णानिस्तृणामिवेद्यां
स्तोप्रादेशंकुर्याददितिर्मातेतिमंत्रेण॥ ॥आश्रावयिष्यंतमनुमंत्रयेताश्रावयप्रथंदेवेषुश्रावय
मांमनुष्येषुकीर्त्यैयशसेब्रह्मवर्चसायेति। प्रवरणानं॥ देवसवितरेतंत्वावृणतेग्निंहोत्रायसहपि
त्रावैश्वानरेणद्यावापृथिवीमांपातमग्निर्होताहंमानुषइतिमानुषइत्यध्वर्योऽश्रुलोदायुषास्वापु
षोदोषधीनांरसेनोत्सर्जन्यस्यधामभिरुदक्रामममृतांअनिविस्कनिष्ठेत्॥ अध्वर्युग्रहणमुनरार्थं।

श्रौ॰ र॰ पश्चिमाध्वर्योर्निवर्तिश्चपाशा अग्निंहोतारमंतरा विक्रता:॥ सिनंतिपाकमतिधीरए तीत्यु
काय॥ ॥बूयादिति शेष:।नायमुच्छानमंत्र:पूर्वेणैवानिरपेक्षत्वात्।अतइद्धोमंत्रोमंत्रस
ङक:॥।॥ऋतस्यपंथामन्वेमिहोतेत्यभिक्रम्यासध्वर्युमन्वारभतपार्श्वस्थेनपाणिना॥ ॥अत्राध्व
र्युग्रहणेनप्रयोजनमभिक्रमणान्वारंभणेध्वर्योरेवकुर्यान्नत्वतिप्रस्थातुरित्येतत्।जानुबाह्वो:
संधिरंसस्तस्मिन्देशेध्वर्युमन्वारभेतपार्श्वस्थेनपाणिनापार्श्वेनतिष्ठतीतिपार्श्वस्थ:कनिष्ठिका
प्रदेशेनास्थित:नन कूर्पराग्रेणइत्यर्थ:।तेनान्वारभेताध्वर्युं॥ ॥आग्नीध्रमेकदेशेनसव्येन
वा।सव्येनपाणिनापार्श्वस्थेनांसएकांकेनऊरुणावा॥ ॥इंद्रमन्वारभामहेहोतृवृर्यपुरोहि
तं।येनायन्नुत्तमंस्वर्देवा अंगिरसोदिवमिति॥ ॥उभयो:साधारणमंत्र:अतोनावृत्तेनेनोद्यते
त॥ ॥संमार्गतृणैरभ्यात्ममुखंसंमृजीत।संमार्गोसिसंमांप्रजयापशुभिर्मृद्धीति॥ ॥
इध्मसंनहनानिसंमार्गशब्देनोच्यंते।अग्निसंमार्जनसाधनत्वात्तैस्तृणैरभ्यात्ममुखं
संमृजीत।तत्पीठेशलाकावनात्तृणीभूतैरेवतै:संमृजीतनग्रंथिभूतै:पाशभूतैरितिगम्यते॥ १६

अभ्यात्ममात्माभिमुखंपाणितलमवाग्पर्वकंर्ध्वंसंमार्जनमिति॥सकृन्मंत्रेणद्विस्तूष्णींसर्वत्रैवंक
र्माप्रतो॥ ॥सकृन्मंत्रेणद्विस्तूष्णीमित्येतत्सर्वत्रभवत्येवंप्रकारस्यकर्मणआरत्नौसत्यामिति॥
एवंप्रकारशब्देनसंस्कारकर्मत्वमुच्यते।एतदुक्तंभवति।यत्रसंस्कारकर्मणस्त्रिरावृत्तिर्विधीयते।तत्र
सकृन्मंत्रेणद्विस्तूष्णीमिति।नप्रधानकर्मण:॥ ॥स्पृष्ट्वोदकंहोतृषदनमभिमंत्रयेताहेदैधिषव्योद
तस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकतरइति॥ होतृषदनमपरेणास्थित्वाप्राङ्मुखोभिमंत्रयेत।इदमुद
कोपस्पर्शनंपूर्वाङ्गं।अग्निसंमार्जनतृणैरात्मनोमुखसंमार्जनात्।आत्मनोयदोषस्तत्क्षालनार्थ
तेनास्यदृष्टार्थत्वंभवति॥अंगुष्ठोपकनिष्ठिकाभ्यांहोतृषदनात्तृणंप्रत्यग्दक्षिणा।निरसेन्निरस्त:
परावसुरितीदमहमर्वावसो:सदनेसीदामीत्युपविशेद्दक्षिणोत्तरेणोपस्थेन॥ ॥दक्षिणंचतदुत्त
रंचदक्षिणोत्तरं।तद्यथानुपस्थेदक्षिणोत्तरीतेनोपविशेत्॥ ॥एतेनिरसनोपवेशनेसर्वासने
ष्वसर्वेषामहरह:प्रथमोपवेशनेपिसमाने॥ ॥एतइतिमंत्रप्रकारमंत्रावशिष्टयोग्रहणा
र्थ॥तेचसर्वेषांसर्वासनेषुप्रथमोपवेशनेभवत:।नाह्वितीयादिप्रयोगइत्येकोर्थ:।समानेप्या
सनेअहर्गणेष्वहरह:प्रथमोपवेशनेभवत:अयमपरोर्थ:।समानेपिस्थानेप्रयोगावृत्तोपुन:पुन

श्रौ॰ र॰ रात्रौ तेंतिप्रवर्ग्यादिषु अयं वा परोपि शब्दः स्त्रूयते। अस्य विधेर्दर्शपूर्णमासप्रकरणे पठितत्वान्न दर्विहोमेष्वेव
क्षिप्रसु सोमेषु भवति नाग्निहोत्रादिष्विति। अंकधारणं भवत्येव॥ द्विरिति गोतमः॥ ॥ अस्याशयस्य द्विः द्विती
वि येप्रयोगे भवतीत्यभिप्रायः॥२॥ ब्रह्मौदने प्रा॥शिष्यमाणे न्याधेये ब्रह्मा॥ द्विरित्यनुवर्तते। त्रियमाणस्य
कर्मणः दक्षिण उपविष्टः सन् बहिष्पवमानं गत्वा पुनर्ब्रह्मौदनप्राशनकाले द्विती येनिरसनोपवेशनप्रा
प्तिरिति गम्यते अग्न्याधेयग्रहणमश्वमेधेय ब्रह्मौदनं तत्र नैवं कर्तव्यमिति॥ बहिष्पवमानात्प्रसर्पत्सु सोमे॥
आहवनीयस्य दक्षिणत उपविष्टः सन् बहिष्पवमानं गत्वा ततः प्रत्येत्य पूर्वासने पुनः कुर्यात्। सोम
ग्रहणं सर्वेषु सोमेषु प्रापणार्थं इतरथा धानाधिकारात्तत्संबंध एव सोमे स्यान्न सर्वसोमेष्विति॥ प्रस
प्य होता॥ पश्चार्थमुपविष्ट एवासने सदः प्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्। होतृग्रहणं ब्रह्मा धिकारनि
वृत्त्यर्थं॥ स्रुगादापने पशौ॥ स्वाहाकृत्यस्वाहाकृत्यर्थं स्रुगादापने कुर्यात्॥ न पत्नीसंयाजेके॥॥
पत्नीसंयाजार्थ उपवेशने नैव कुर्यात्॥ नान्यत्र होतुरिति कौत्सः॥ होतुरन्येषां मन्येन भवतीति कौत्सो
मन्यते॥ उपविश्य देव बर्हिः स्वासस्थं त्वाध्यासदेयमिति॥ उपविश्यानंतरं ब्रूयादित्यर्थः॥ अभिहिषहो
तः प्रतरां बर्हिषि देवेति जानुशिरसा बर्हिरुपस्पृश्यातऊर्ध्वं जपेत्। जानुशिरोजो न्वग्रं। अतऊर्ध्वग्रहणमु
पस्पृशतो न जपस्यादिति। तेनान्यत्रैवं रूपशब्दे सति कुर्वन्नेव कुर्यादिति गम्यते। अरणी संस्पृश्य मंथये १८
दित्यादिषु॥ भूपतये नमो भुवनपतये नमो भूतानां पतये नमो भूतये नमः प्राणं प्रपद्ये पानं प्रपद्ये व्यानं

व्यानं प्रपद्ये वाचं प्रपद्ये चक्षुः प्रपद्ये श्रोत्रं प्रपद्ये मनः प्रपद्य आत्मानं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं॰ प्रप॰ सूर्यो
नो दिवस्पातु नमामहे ह्याने नमो अर्भके भ्यो विश्वे देवाः शास्तन मा यथेह हा राधि होता निषदाये
जीयांस्त दद्य वाचः प्रथमं मसीयेति समाप्य प्रदीप्तइध्मे स्रुचा वादापयेन्निगदेन। समाप्य प्र
दीप्ते इत्युभयस्य स्रुगादापनावसरप्रदर्शनार्थत्वा ज्जपसमाप्तिरपि प्रदीप्त एवेति गम्यते।
दीप्ते इत्युभयस्य स्रुगादापनावसरप्रदर्शनार्थत्वा ज्जपसमाप्तिरपि प्रदीप्त एवेति गम्यते।
अनेन निगदेन आदापयेत्स्रुचावाध्वर्यु। अग्निर्होता वेत्व ग्नेर्होत्रं वेत्तु प्रावित्रं साधु ते यजमान
देवताया अग्निमित्यवसाय होतारमवृथा इति जपेत्। अवसायेति वचनं निगदमध्ये उच्छ्वा
सलाभार्थं। जपेदिति निगदमध्ये उपांशुत्वलाभाय। अथ समाप्ये ष्टुतवती मध्वर्येस्त्रुचि
मास्य स्वदेवयुर्वविश्ववारे ईळामहे देवाँ ईळेन्यान्नमस्याम नमस्यान्यजाम यज्ञियानिति।
अथेति वचनमत्रा प्युच्छ्वासलाभार्थं समाप्तिवचनमग्निर्होतेत्यादेर्यज्ञियानित्यंतस्य एकनि
गदत्वसूचनार्थं। समाप्तेस्मिन्निगदे ध्वर्युराश्रावयति। अध्वर्युकर्मविधानं प्रत्याश्रावणस्य दे
निमित्तमिति ज्ञापनार्थं। समाप्तिवचनमाश्रावणे कृतेपि समाप्त एव निगदे प्रत्याश्रावणं कुर्यादित्ये
वमर्थं। प्रत्याश्रावयेदाग्नीध्रउत्करदेशे तिष्ठन् स्फ्यमिध्मसन्नहनानीत्यादाय दक्षिणामुख इति

श्रो॰ इ॰ शाट्यायनकमस्तुश्रौषळित्योकारंप्लावयन्। शाट्यायनग्रहणंविकल्पार्थं। अतःप्राङ्मुखत्व
मपिलभ्यते। प्लावयन्प्लुतंकुर्वन्नित्यर्थः॥ ४ ॥ प्रयाजेष्वृतंति। वक्ष्यमाणलक्षणायागाःप्रया
जाइत्युच्यंते। तेष्वृतंतियजंतीत्यर्थः। पंचैतेभवंति। पंचवचनंनराशंसःतनूनपाद्द्वाद्यामुष्या
यणस्यापिपंचैवभवंतिनषळित्येवमर्थं। एतद्रतिवचनंपठिताएवैतेतनूनपान्नराशंसयोरन्य
तरेणसहपंचभवंति। नापठितेनसहेत्येवमर्थं। एकैकंप्रेषितोयजति। नसकृत्प्रेषितःसर्वान्
यजति। आगूर्याज्यादिरनुयाजवर्जं। सर्वत्रसर्वासामनुयाजादिवर्जितानांयाज्यानामादावा
गूर्भवति। कोयमागूरित्याह। येयजामहइत्यागूः। वषट्कारोंत्यःसर्वत्र। अनुयाजानामपी
तिसर्वत्रवचनं॥ उच्चैस्तरांवलीयान्याज्यायाः। अत्रोच्चैस्तरत्वमेकयमाधिक्यं। वलीयस्त्वं
व्यक्ततरोच्चारणं। एतदुभयंयाज्यायाएव। तयोरादीप्लावयेत्। तयोरागूर्वषट्कारयोराद्या
प्लुतिःकार्या॥ याज्यांतंच। प्लावयेदितिशेषः॥ विविच्यसंध्यक्षराणामकारंनवेद्वैवचनोव्यंज १८
नांतोवा॥ नवेत्प्रगृह्यइतिपठितव्येननवेद्वैवचनइतिप्रमादपाठः। ऋगंतेयानिअप्रगृह्याणि

संध्यक्षराणितानि। विविच्याकारमेवप्लावयेदिति एकारैकारयोःआइइतिओकारौकारयोः
आउ। इत्येवंविविच्यप्लुतिःकार्या ज्येष्ठश्चमंत्रोविश्वचर्षणा ३ इवौषडित्यादिदृष्टांतः। ए
कारस्यप्रगृह्यस्यस्वरूपेणैवप्लुतिःकार्या। ओकारस्तुस्यतुप्रगृह्यसंज्ञायाअनित्यत्वान्नि
त्यानित्यसंयोगविरोधात्तस्यसर्वदापिविविच्यैवप्लावनंकर्तव्यं॥ व्यंजनांतोवा। व्यंजनांता
नांसंध्यक्षराणांसर्वदास्वरूपेणैवप्लुतिःकार्या। नविवेकःकर्तव्यः। अधिश्रियंशुक्रपिशंद
धाने ३ वौ ३ षडित्यादिदृष्टांतः॥ विसर्जनीयोनन्त्यक्षरोपधोरिफ्यते। अनन्त्यक्षरोपधः। अ
नवर्णोपधइत्यर्थः। सवषट्कारेणसंधीयमानोरिफ्यतेपिबासोममभियमित्यादिनिदर्श
नं॥ इतरश्चरेफी॥ इतरअवर्णोपधःसचरेफिसंज्ञीचेत्रिफ्यतेमहोयोवर्जामितरोयथो
क्तमित्यत्ररेफिसंज्ञाधिगंतव्या। उतत्यंचमसंनवमित्यादिनिदर्शनं॥ लुप्यतेरेफी॥ अवर्णो
पधोयोविसर्जनीयःरेफिसंज्ञश्चनभवति। सलुप्यतएववषट्कारसंधौ। अर्वाङेहिसोम
कामिमित्यादिनिदर्शनं॥ प्रथमःस्वंतरतीयं॥ वर्गाणांयोयःप्रथमःसस्वंतरतीयमापद्यते॥

श्रौ.वृ. नित्यंमकारे॥ अंतस्थासुतांता मित्यनेनोक्तमित्यर्थः। ये३यजामहे समिधः समिधोअग्न
आज्यस्यव्यंतु३ वौ३षळिति वषट्कारः। वौषट् शब्दो वषट्कार इत्यर्थः। इतिप्रथमः। अयं
प्रथमः प्रयाज इत्यर्थः। वागोजः सहओजोमयिप्राणापानाविति वषट्कारमुक्त्वोक्तानुमंत्र
यते। सर्वस्यायंविधिस्यादित्येवमर्थावीप्सा। द्विवाकीर्त्येविषट्कारः। तृथारात्रौनप्रयोक्तव्य
इत्यर्थः। किंचवषट्कारसंबंधियत्कर्मतद्विध्यंतराविरोधेसति द्विरेवकर्तव्यमिति॥ तथानुमंत्र
णं॥ द्विवाकीर्त्यमित्यर्थः। तच्चोक्तार्थमेव। एतद्याज्यानिदर्शनं। यदिदंयाज्यायाः पुरस्ता
दागूः तस्याश्चादौयाज्यांतेचश्रुतिः उपरिष्टाच्चवषट्कारस्तस्यचादौश्रुतिस्ततोनुमंत्रणं
इत्येतद्याज्यायारूपनिदर्शनं। अनुमंत्रणस्ययाज्यांतर्भावव्युदसनार्थंवाग्यमनार्थं॥ तनू
नपादग्नआज्यस्यवेत्विति द्वितीयोन्यत्रवसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः। वसिष्ठादिभ्यो
न्येषामयंद्वितीयः। नराशंसोअग्नआज्यस्यवेत्विति तेषां। वसिष्ठादीनामयंद्वितीयः। इळोअ १८
ग्नआज्यस्यव्यंत्विति तृतीयः। सर्वेषामितिशेषः। बर्हिरग्नआज्यस्यवेत्विति चतुर्थः। आ

गूर्यपंचमेस्वाहाग्निंस्वाहामुमिति यथावाहितमनुद्रुत्यदेवतायथाचोदितमनावाहिता स्वाहा
देवाआज्यपाजुषाणाअग्नआज्यस्यव्यंत्विति। पंचमएवंकृत्वा तेनैवयजेदितिशेषः। आगुरो
विधानंक्रमार्थं। प्रतिदेवतंस्वाहाशब्दाभ्यासार्थंवीप्सावचनं। यथावाहितग्रहणंप्रमादादावा
हितायाअस्थानिन्याअपिग्रहणार्थं। यथाचोदितमित्यनेनस्थानिन्योपियादेवताप्रमादा
दनावाहिताःस्युस्तासामप्यत्रयथाचोदितक्रमेनिगमनार्थं। प्रयाजाद्यनुयाजांतेत्यादिषुय
थाचोदितंतदीयानांदेवतानांनिगमनार्थंच। इदमेवप्रकारद्वयमनावाहितग्रहणाद्गृह्यते। ना
न्यथा। यथावाहितग्रहणेनपठितावाहनावगृह्यंते तासांपाठदेवनिगमनं। नान्यथेत्यर्थः।
स्वाहादेवाइतियथासूत्रंमंत्रशेषः॥ आतोमंद्रेण॥ इतः पूर्वंयत्तन्मंद्रेणप्रयोक्तव्यं। अत्रपूर्वा
त्रैधेरबाधाभावादन्यत्रैतत्पूर्वमग्निमंथनादियद्भवति तदपिमंद्रेणप्रयोक्तव्यमितिगम्यते। त्री
णियानस्थानानिमंद्रमध्यमोत्तमसंज्ञकानि। तेषुचसप्तसप्तयमाभवंति। यमानामावरस्था
तत्रसप्तमयमेनवषट्कारप्रयोक्तव्यः। ततएकावरोहणायाज्या। एवंसर्वत्र। एकैकयमावरोह

श्रौ॰ वृ॰ णवषट्कारः प्रयोक्तव्यः। ऊर्ध्वं विशं युवाकात्। मंद्रेण प्रयोक्तव्यं। मध्यमेन हवींष्या स्विष्टकृतः॥
सर्वत्राकारो ऽभिविधावेवात्रत्वभिविधौ मर्यादायां वा आवृत्य ध्वर्युवशात्। अतः स्विष्टकृत्। मध्य
मेनोत्तमेन वा अध्वर्युवशात् प्रयोक्तव्यः। प्रयाजेभ्य ऊर्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः। हविर्ग्र
हणं स्थानांतरे ऽपि प्रधानहविषां मध्यमस्वर एवेति॥ उत्तमेन शेषः। इडादि स्विष्टकृदादिर्वा शं
युवाकांतः शेष इत्युच्यते। स उत्तमेन प्रयोज्यः। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्या
नुवाक्या। त्वं सोमासि सत्पतिरित्युत्तरस्य। जुषाणो अग्निराज्यस्य वेत्विति पूर्वस्य याज्या। जु
षाण॰ सोम आज्यस्य हविषो वेत्वित्युत्तरस्य। तावाग्नूर्यादिशं यजति। तावित्याज्यभागसंप्र
त्ययार्थं। आग्नूर्येति देवतादेशस्य क्रमविधानार्थं। यजतीति देवतादेशस्य याज्यया संधा
य यजतीत्यर्थः। सर्वश्चानुवाक्यावत्यो ऽप्रैषा अन्या अन्वायात्याभ्यः। या अन्वायात शब्देनानु
निर्वापशब्देन वा चोदिताः। ता अन्वायात्याः ताभ्यो ऽन्या या देवता अनुवाक्यावत्यो ऽप्रैषाश्च ताः २०
सर्वा आदिश्य यष्टव्याः। अन्वायात्यानामनुवाक्यारहितानां च संप्रैषाणामादेशो न कर्तव्य इत्यर्थः।

सर्वग्रहणमाज्यभागयोरपि संप्रैषयोरादेशनिवृत्त्यर्थं। सौमिकीश्च या अंतरेण वैश्वानरीयं
पत्नीसंयाजांश्च। सौमिक्यः सोम उत्पन्नाः न सोमे प्रयोज्या अपि तत्रोत्पन्नानामेव तत्र प्र
वृत्तसंभवात् वैश्वानरीयपत्नीसंयाजानां तु छंदश्चोदितानामेव ग्रहणं युक्तं। अत एतस्मिन्ने
वासने वैश्वानरीयस्य यजतीत्येतदेव गृह्यते पत्नीसंयाजैश्चरित्वावभृथं व्रजंतीति एतदेव
च। अन्यादृत्यनुवर्तते अंगप्रधानरूपे सोमकर्मणि यौ तौ वैश्वानरीयपत्नीसंयाजशब्दचो
दितौ पदार्थौ तयोर्मध्ये या स्तत्रैवोत्पन्ना देवतास्ताभ्यो ऽप्यन्या देवता आदिश्य यष्टव्या न ता
आदिश्य यष्टव्या इत्यर्थः॥ एतौ वार्त्रघ्नौ पौर्णमास्यां। यावेतौ पौर्णमास्यामाज्यभागौ तौ वा
र्त्रघ्नसंज्ञौ भवत इत्यर्थः। स निमित्तेयं संज्ञेत्याह। अनुवाक्यालिंगविशेषान्नामधेयान्यत्वं।
ततो विचारः। अनुवाक्यात एव विना राचगमो ऽन्यत्वमित्यर्थः॥ नित्ये याज्ये। उक्ते एव मे सर्वत्र
याज्ये नानुवाक्या वदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंतावमावास्यायां। अग्निः प्रत्नेन मन्मना
सोमगीर्भिष्ट्वा वयमिति॥ आतो वाग्यमनं। आ इत आरभ्याज्यभागपर्यंतं वाग्यमनं भवति।

श्रौ॰ टी॰ अंतरावयाज्यानुवाक्ये। निगदानुवचनाभिष्टवनशस्त्रजपानां चारभ्यासमाप्तेः। अत्राभिष्टव
नसंस्तवनशस्त्रेति संस्तवनशब्दः पठितव्यः। आरभ्येति वचनमन्यदपि पूर्वत्र याज्यादिभ्यस्त
दारभ्यासमाप्तेर्वाग्यमनसिध्यर्थं। होतुरधिकारात्कर्तृत्वस्यापि प्रापणार्थं चेति। अन्यद्यज्ञ
स्यसाधनात्। यज्ञसाधनवचनसोन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनवचनेनानामयद्यज्ञसं
पादनार्थं तद्दोषपरिहारार्थं च॥ आपद्यातो देवा अवंतु न इति जपेत्। आपद्येति नियममतिक्र
म्येत्यर्थः॥ अपिवान्यां वैष्णवीं। अन्यामपीति वचनं पूर्वोक्तायाअपि वैष्णवीत्वप्रतिपत्यर्थं॥ ५॥
उक्ता देवतास्तासां याज्यानुवाक्या अग्निर्मूर्धा भुवः वायवस्यायमग्निः सहस्त्रिण इति वेदं विष्णुर्वि
चक्रमे त्रिर्देवः पृथिवीमेष एतामग्नीषोमासवेदसा युवमेतानि दिवि रोचनानीन्द्राग्नी अवसा
गतं गीर्भिर्विप्रः प्रमतिमिच्छमान ऐंद्र सानसिं रयिं प्रससाहिषे पुरुहूत शत्रून्महाँ इंद्रो य ओ
जसा श्रुधी हवमिंद्र ब्रह्मणा महानिति पद्यग्नीषोमीय उपांशु याजोग्नीषोमावो अद्या वामान्यं
दिवो मातरिश्वाजभारेति। उक्तसंकीर्तनं देवताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्य २१
माणा लिंगक्रमाभ्यां योजनीया इति। इदमपि उक्तसंकीर्तनस्य प्रयोजनं। यत्र देवता विधाय तदनं
तरमन्त्रो विधीयंते तत्र तासां देवतानां ता एव याज्यानुवाक्या इति सार्वत्रिकोयं विधिरित्येतत् ज्ञाप
यितुं। अयमग्निरिति गायत्र्यापि याज्यानंतरमुक्तत्वाद्याज्ये भवति। सा तु गायत्री सामान्याद्बाधा
न एव भवति। यद्यग्नीषोमीय इति व्युत्क्रम्यातेपठन् असंशयार्थमुक्तवानाचार्यः। अथ स्वि
ष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या। अथ शब्दः प्रधानानंतरं स्विष्टकृतो यागः
स्यान्नावाहनक्रमेणेति। अनुवाक्यावचनं सर्वत्र पूर्वमनुवाक्या पश्चाद्याज्येति प्रदर्शनार्थं।
ये ३ यजामहेग्निं स्विष्टकृतमयाळग्निरित्युक्त्वा षष्ठ्या विभक्त्या देवतामादिश्य प्रियाधामा
न्ययाळित्युपसंतनुयात्। आगूर्विधानं निगदादावेवस्यान्नऋगादावित्यग्निं स्विष्टकृतमपि
तिवचनं अग्निहोत्रायशब्देना देशो न स्यादिति। षष्ठीविधानं द्वितीयायानिवृत्त्यर्थं देवतामादिश्य
प्रियाधामानीति शब्दमुपसंतनुयात्। अयाडू शब्दः पूर्वपठित एवोत्तरे सूत्रेण तस्यास्तस्यादे
वतायाः पुरस्तादनिर्देशरूपेण विधीयते। देवताया उपरिष्टाद्विधीयमानेन प्रियाधामानि शब्द

श्रौ॰वृ॰ ढ्वेन संधानार्थं प्रियाधामान्यपाक्लिति संतेतं पठितं। अतोत्र प्रतिदेवतमेक एवायाड्शब्दः प्र
योक्तव्यो न द्वितीय इति स्थितं। एवमुत्तराअयाळ्याळितित्वेवतासां पुरस्तात्। उत्तरासामयं
विशेषः। अयाड्शब्द एवतासां पुरस्तात् पुरस्तात्प्रयोज्यो नाग्निशब्दोपीति। एतदुक्तं भवति।
प्रथमदेवतायाः पुरस्ताद्याळग्निशब्द उत्तरासामयाड्शब्द एव सर्वासामुपरिष्टात्प्रियाधा
मानि शब्दः सर्वत्र संततावक्तव्या इति। आज्यपांतमनुक्रम्य देवतानामाज्यपानां प्रियाधामानि
यक्षदग्नेर्हेतुः प्रियाधामानियक्षत्त्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वराजातवे
दाजुषतां हविरग्ने यद्य विशो अध्वरस्य होतरित्यनवानं यजतीति। आज्यपांतमिति प्रसि
द्धक्रमसंग्रहादावाहनक्रमोत्रापि परिगृह्यते तेनास्थानिन्यानि गमनमिहापि स्यात्। आ
ज्यपांतमेवमुक्त्वा तदनंतरेण प्रियाधामानि शब्देन यक्षदिति संधाय यथासूत्रमुक्त्वा जुषतां
हविरग्ने यद्योत्र वानुब्रूस न्यजेत्। सर्वत्रानुब्रूसः कर्तव्योस्यां याज्यायां॥ प्रकृत्यावा। अ २२
धर्वे वाब्रूसेत्॥ ६ ॥ प्रदेशिन्याः पर्वणी उत्तमे अंजयित्वौष्ठयोरभ्यात्मं निमार्ष्टि। प्रदेशि

नीनामांगुलिविशेषः। पर्वसंधिः उत्तमे इत्यग्रतो द्वे पर्वणी इत्यर्थः। अध्वर्युणा ते पूर्वणी अं
जयित्वा अभ्यात्मं पाणितलं कृत्वा। ओष्ठयोरवर्गिपवर्गे निमार्ष्टि। वाचस्पतिना ते हुतस्ये
षे प्राणाय प्राश्नामीत्युत्तरमुत्तरे मनसस्पतिना ते हुतस्योर्जे पानाय प्राश्नामीत्यधरमधरे।
अनेनैकस्मिन्नित्यनयोरर्थः। स्पृष्टोदकमांजलिनिवद्धां प्रतिगृह्य सव्ये पाणौ कृत्वा पश्चादस्या
उदगंगुलिं पाणिमुपधाय वांतरेळामवदापयीत। द्विहस्तसंयोगोंजलिः तं कृत्वा तेनेळां गृ
हीत्वा सव्ये पाणौ कृत्वा निधायेत्यर्थः। अस्यादिती ळाया इत्यर्थः। या हस्ते वदीयते सा अवां
तरेळा अवदापयीताध्वर्युं। अंतरेणांगुष्ठमंगुलीश्च स्वयं द्वितीयमाददीत। अंगुल्यंगुष्ठ
योर्मध्येन प्रदेशेन स्वयमिळाया अवांतरेळामाददीत। प्रत्यालब्धामंगुष्ठेनाभिसंगृह्य प्र
त्याहृत्य। प्रत्यालब्धां स्पष्टामध्वर्युणेत्यर्थः। अंगुलीरमुष्टिं कृत्वा दक्षिणतः ळां परिगृ
ह्यास्यसंमितामुपकल्पंते प्राणसंमितां वा। अमुष्टिं कृत्वा अंगुलिभ्यो बहिरंगुष्ठमकृत्वेत्यर्थः।
सव्ये हस्ते निहितामिळां दक्षिणेन हस्तेन गृहीत्वा वांतरेळां दक्षिणतः परिगृह्यास्यसंमितां

श्रौ॰सू॰ प्राणसंमितांवेलांकृत्वातामुपह्वयतेप्राणसंमितांनासिकासंमितामित्यर्थः॥ इडोपहूतास
हदिवाबृहतादित्येनैनोपास्मां इडाह्वयतांसहदिवाबृहतादित्येनेडोपहूतासहांतरिक्षेण
वामदेव्येनवायुनोपास्मां इडाह्वयतांसहांतरिक्षेणवामदेव्येनवायुनेडोपहूतासहपृथि
व्यारथंतरेणाग्निनोपास्मां इडाह्वयतांसहपृथिव्यारथंतरेणाग्निनेडोपहूतागावःसहा
शिरउपमांगावःसहाशिराह्वयंतामुपहूताधेनुःसहऋषभोपमांधेनुःसहऋषभाह्वयतामु
पहूतागौर्घृतपद्युपमांगौर्घृतपदीह्वयतामुपहूतादिव्याःसप्तहोतारउपमांदिव्याःसप्तहो
तारोह्वयंतामुपहूतःसखाभक्षउपमांसखाभक्षोह्वयतामुपहूतेडावृष्टिरुपमामिडा
वृष्टिर्ह्वयतामित्युपांश्वथोच्चैः॥ इडोपहूतोपहूतेडोपास्मां इडाह्वयतामिडोपहूता।
मानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याअध्वर्यवउपहूताउपहूतामनुष्याः
।यइमंयज्ञमवान्येवयज्ञपतिंवर्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रे।उप २३
हूतोयंयजमानउत्तरस्यांदेवयज्यायामुपहूतोभूयसिहविष्करणइदंमेदेवाहविर्जुषंतामिति

तस्मिन्नुपहूतइति।इडोपहूतासहदिवेत्यादिनातस्मिन्नुपहूतइत्यंतेनउपह्वयतेइत्युपांश्वित्य
नेननिगदानांतत्रस्वरत्वादप्राप्तमुपांशुत्वंविधीयते।तेनैकश्रुत्यमनुपरतमेवेतिस्थितं।अथो
च्चैरित्यनेनोत्तरस्यनिगदभागस्यतत्रस्वरानपगमःकथ्यते।प्राप्तत्वान्नापूर्वंविधीयते।तस्मि
न्ननुच्यमानेसंशयःस्यान्निगदमध्येउपांशुत्वमुच्यमानंकिंसर्वस्यनिगदस्य।आहोस्वित्पू
र्वस्यभागस्यपरस्यवेति।अस्मिंस्तूच्यमानेपूर्वस्यैवभागस्योपांशुत्वंविहितंभवतिनोत्तर
स्यभवतीतिनात्रसंशयः।पुरामानवीशब्दात्।उपहूतामनुष्याःदेवीदेवपुत्रेइतित्रीण्यव
सानानि॥उपहूयावांतरेडांप्राश्नीयाद्दक्षिणेभागंजुषस्वनः।पिन्वगाजिन्वावंतोरायस्पोषस्य
शिषेतस्यनोरास्वतस्यनोदास्तस्यास्तेभागमशीमहिसर्वात्मनःसर्वतनवःसर्ववीराःसर्व
पूरुषाःसर्वपुरुषाइतिवा।उपहूयेत्यनूच्यमानेहविर्जुषंतामितिनिगदांतःस्यात्।तस्मिन्नुप
हूतइत्यवांतरेडाभक्षणमंत्रः।स्याद्दक्षिणेभागमितिवानयोर्विकल्पार्थोवाशब्दः।सर्वपूरुषाः
सर्वपुरुषाइतिपदद्वयविशिष्टश्चमंत्रइत्येतेदोषाःस्युःएतस्मिंस्तूच्यमानेतस्मिन्नुपहूतइत्ये

श्रौ.वृ. मंतोनिगदःस्यात्। पुरुषादृतिशब्दोनिगदैकदेशःस्यात्‌वाशब्दश्च मंत्रावयवविकल्पार्थएव
स्यात्। सर्वपुरुषाइत्यंतइतिशब्दात्‌नैतावा‌न्तावानेवचमंत्रःस्यादित्येवंसर्वसमंजसंभ
वति। होतावांतरेळांभक्षयित्वेळामपिभक्षयेत्। सर्वेवसयजमानादूळांभक्षयेयुः। इळास
र्वेषामितिपशुविभागेदर्शनात्। शास्त्रांतरेचयजमानपंचमाइळांभक्षयेयुरितिदर्शनाच्च।
॥ ७॥ मार्जयित्वानुयाजेश्चरंति। मार्जनमिळाभक्षणांगं। क्रियायामिळाभक्षणाभावेमार्ज
नस्याप्यभावदर्शनात्। भक्षयितुर्मार्जनेदृष्टश्चोपकारोस्तिशुद्धिर्नामातइळांतकर्मस्वपि
मार्जनमस्त्येव। नैतदनुयाजांगंचतुर्धाकरणदक्षिणादानाभ्यांव्यवहितत्वात्। क्रियायामन
नुयाजसत्तायामपितदभावदर्शनाच्च। अतोमार्जयित्वानुयाजैश्चरंतीतिवचनंचतुर्धाकर
णदक्षिणादानयोरनित्यत्वसूचनार्थं। तथाह्यनाग्नेयेषुचतुर्धाकरणंनास्तिअंगभूतेषुदक्षि
णादानंनास्तीति। परिस्तरणैरंजलिमंतर्धायापआसेचयतेतन्मार्जनं। आहवनीयस्यप
रिस्तरणैः। भक्षणार्थंनिष्क्रम्यपुनःप्रविष्टानांप्रथमप्राप्तत्वात्‌तेषामासेचयतेऽपःसहका २४

रिणा॥ देवाद्योनुयाजाः। देवादयोदेवशब्दादयइत्यर्थः। पुनरनुयाजग्रहणंउत्तरस्यसूत्रस्य
प्रयाजानुयाजार्थत्वाय॥ वीतवत्पदांताः॥ वीतवत्पदांतत्वंप्रयाजानुयाजयोर्गुणःस्यात्। त्रयः
। तेनुयाजास्त्रयोभवंति। एकैकंप्रेषितोयजति। देवान्यजेतिप्रथमसंप्रैषस्यसर्वार्थत्वेसत्य
पिपुनःप्रेषितएवयजेत्। इमेनुयाजाः॥ देवंबर्हिर्वसुवनेवसुधेयस्यवेतुदेवोनराशंसोवसु
वनेवसुधेयस्यवेतुदेवोअग्निःस्विष्टकृत्सुद्रविणामंद्रःकविःसत्यमन्मायजीहोताहोतुर्हो
तुरायजीयानग्नेयांदेवानयाळ्यांअपिप्रेयेतिहोत्रेअमत्सततांससनुषीहोत्रांदेवंगमां
दिविदेवेषुयज्ञमेरयेमांस्विष्टकृच्चाग्नेहोताभूर्वसुवनेवसुधेयस्यनमोवाकेवीहीति। अन
वानंवा। अमत्सतेत्यत्रावसायवा। अनवसायवायजेत्॥ ८ ॥ सूक्तवाकायसंप्रेषितइदं
द्यावापृथिवीभद्रमभूदार्धमसूक्तवाकमुतनमोवाकमृध्यास्मसूक्तोच्यमग्नेत्वंसूक्तवागसि।
उपश्रुतीदिवस्पृथिव्योरोमन्वतीतेस्मिन्यज्ञेयजमानद्यावापृथिवीस्तां। शंगयीजीरदानू
अत्रस्नूअप्रवेदेउरुगव्यूतीअभयंकृतो। वृष्टिद्यावारीत्यापाशंभुवौमयोभुवाऊर्जस्व

श्रौ·१ तीपयस्वतीसूपचरणाचस्वधिचरणाचतयोराविदीत्यवसायप्रथमयाविभक्त्यादिश्यदे
वतामिदंहविरजुषतावीवृधतमहोज्यायोकृतेत्युपसंतनुयात्॥ असि। स्तां। अभयंकृतो।
विद्दि। कृतेतिवाअक्रातामक्रतेत्येवंयजमानस्यनामनी। मानुषाः। इत्यवसानानिसर्वाणि
निगदे। अत्रतुप्रथमाविधानंद्वितीयानिवृत्त्यर्थं। आविदीत्यत्रावसाप्रथमयाविभक्त्यादि
श्यदेवतामिदंहविरित्युपसंतनुयात्॥ एवमुत्तराः। उत्तरामपिदेवताआदिश्यइदंहवि
रित्येवमुपसंतनुयात्॥ अक्रातामक्रतेतियथार्थं। द्विदेवतबहुदेवतयोरेवमूहःकर्तव्यः
यथार्थवचनंअर्थवशेनाभिधानमित्येवमर्थं॥ उक्तमुपांशोः। आवहस्वहेत्युक्तमित्यर्थः।
उक्तवचनमस्यनिगदस्यपशावपीष्टिवद्देवप्रयोगार्थंनसूक्तवाकप्रैषवदजुषतादीनामुपां
शुत्वंभवति॥ आवापिकांतमनुद्रुत्यदेवाआज्यपाआज्यमजुषंतावीवृधंतमहोज्यायोक्रता
ग्निर्होत्रेणेदंहविरजुषतावीवृधतमहोज्यायोकृतास्यामृध्येद्धोत्रायांदेवंगमायामाशा ३५
स्तेयंयजमानोसावसावित्यस्यादिश्यनामनीउपांशुसन्निधौगुरोरायुराशास्तेसुप्रजा

स्त्वमाशास्तेरायस्पोषमाशास्तेसजातवनस्यामाशास्तेउत्तरांदेवयज्यामाशास्तेतदस्या
त्तदृध्यात्तदस्मैदेवारासंतांतदग्निर्देवोदेवेभ्योवनतेवयमग्नेर्मानुषाः इष्टंचवित्तंचोभेच
नोद्यावापृथिवीअंहसस्पातामेहगतिर्वामस्येदंनमोदेवेभ्यइति। आवापिकांतमित्या
दिइदंनमोदेवेभ्यइत्यंतं। आवापिकांतमित्येतदावापिकदेवताक्रमप्राप्त्यर्थंतेनास्थानि
न्यत्रापिनिगद्यते। देवाआज्यपाइतियथासूत्रं। असावसावित्यत्रयजमाननामनीप्रथम
याविभक्त्यानिर्दिशेत्। सांव्यवहारिकंनाक्षत्रंच। होतुर्गुरुश्चेद्यजमानःस्यात्तत्सन्निधौ
उपांशुनामनीब्रूयात्॥ ९॥ शंयुवाकायसंप्रेषितस्तच्छंयोरावृणीमहइत्याहानुवाक्याव
दप्रणवां। अनुवाक्यावद्वचनमेकश्रुत्यप्रापणार्थं। अप्रणवामितिप्रणवोनिषिध्यते॥
५८ वेदमस्मैप्रयच्छत्यध्वर्युः। वेदग्रहणकालज्ञापनार्थमेतत्सूत्रं। अतोध्वर्युणादत्तेगृह्णीया
त्। अदत्तेपिस्वयमेवगृह्णीयात्। तंगृह्णीयात्। वेदोसिवेदोविदेयेति। तमितिवीप्सार्थं।
यदाहोतादद्यात्तदातंगृह्णीयात्इत्यर्थः। यदिद्वौयुगपद्दद्यात्तदाहेनमंत्रंब्रूयात्। वरुणात्र

श्रौ॰सू॰ धासादिषु। उदायुषेत्येतेनो पोत्थाय पश्चाद्गार्हपत्यस्योपविश्य सोमं त्वष्टारं देवानां पत्नीर
२८ ग्निं गृहपतिमित्याज्येन यजंति। एतेनेति वचनं प्रकृतिर्विकारभावे पिक्वत्नस्य मंत्रस्य प्रापणा
र्थं। आज्यवचनं यत्राज्येन सोम इज्यते तत्रैते याज्यानुवाक्ये भवतः। नान्यहविष्के सोम इति।
यजंतीति वचनं याग एव तासां देवतानां न निगमेष्वनुद्रुतिरिति॥ आप्यायस्व समेतु ते सं
ते पयांसि सम्रु यंतु वाजा इह त्वष्टारमग्रियं तन्नस्तुरीपमध पोषयित्नु देवानां पत्नीरुशती
रवंतु न इति द्वे अग्निर्होता गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः।
अन्त इदं संज्ञाविधानार्थं॥ अथ प्रजाकामो राकां सिनीवालीं कुहूमिति प्राग्गृहपतेर्यजेत॥
अथशब्दः पक्षांतरपरिग्रहार्थः। अथ चेद्यजमानः प्रजाकामः स्यात्तदैवैता देवता यजेतेति।
राकामहं सिनीवालि कुहूमह
प्राग्गृहपतेरिति देशविधानेन पूर्वाभिः समुच्चयं दर्शयति। राकामहं सिनीवालि कुहूमह
मिति द्वे द्वे याज्यानुवाक्ये। याज्यानुवाक्यावचनं प्रजाकामो यजेतेत्यनेन यजमानेऽसन्नि २६
हितेऽपि होतैव कर्ता स्यादिति। याज्यानुवाक्ययोर्होतृकर्तृत्वमन्यतः प्रसिद्धमिति। कुहू

~ मिति प्रतीकेग्रहीणेऽपि स्वयमेव पठति। कुहू ~
महं सुवृतं विद्मनापसमस्मिन्यज्ञे सुहवां जोहवीमि। सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि
हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषः शृणोतु। संदाशुषे किरतु
भूरि वामं रायस्पोषं यजमाने दधात्विति। आज्यं पाणितले वदापयीत ... सर्वप्राश्नी
यात्। पर्वांजिनाद्युपक्षानां तत्कार्यं नात्र ... अंतरेण पाणितलस्थं मिति तेत्युच्यते। ततः सर्वं प्राश्नी माज्य
यादित्युच्यते। शंयुवाकोऽभवेन्न वा। आज्ये छायाद् ऊर्ध्वं शंयुवाको भवति। न भवति चेत् पूर्ववत्पु
णां संस्कारप्रकाराः संतीति तत्सूचनार्थमेतत्सूत्रं। यदि स्यात् ... अपि तथा कुर्यादित्येवमर्थं॥ १०॥
वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा। वेदोऽसि वित्तिरसि विदेय कर्मासि करणमसि क्रियासं
सनिरसि सनितासि सनेयं घृतवंतं कुलायिनं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं यं बह
व उपजीवंति योऽजनानामसद्वशी। तं विदेय प्रजां विदेय कामाय त्वेति। पत्न्यै वेदं प्रदाय तां वाचय
ति होताध्वर्युर्वा। वेदोऽसीत्यादि कामाय त्वेत्येवमंतं मंत्रं। वाचनमंत्रस्योच्चैः प्रयोगार्थमित्यध्य
ति। कार्यं तु लिंगजनितमेव। वेदशिरसा नाभिदेशमालभेत प्रजाकामा चेत्। यदि पत्नी

श्रौ. ६ प्रजामेस्यादितिकामयेत तदावेदस्यजानुसदृशेनप्रजादेशेनपत्नीस्वनाभिमालभेत। कामाभावे
२८ विवाचनंभवत्येव॥ अथास्यायोक्त्रंविचृतेप्रत्यामुंचामिवरुणस्यपाशादिति। अथेतिसंबंधार्थः।
कामाभावेवाचनानंतरंयोक्त्रविमोकःस्यान्नत्वालंभनमपीति। अस्याइतियोक्त्रविमोचनंहो
तृकर्तृकमितिदर्शयति। तत्प्रत्यग्गार्हपत्याद्द्विगुणंप्राक्पाशंनिधायोपरिष्टादस्योदगग्राणि
वेदतृणानिकरोति। तद्योक्त्रंद्विगुणंकृत्वागार्हपत्यात्प्रत्यक्प्राक्पाशंप्राङ्मूलाग्रप्रदेशमित्य
र्थः। तंनिदध्यात्। योक्त्रस्यमूलप्रदेशःपाशः पाशशब्दोत्रमूलाग्रयोःप्रदर्शनार्थः। अस्ययो
क्त्रस्योपरिष्टाद्वेदतृणान्युदगग्राणिनिदध्यात्। पुरस्तात्पूर्णपात्रंसंश्लिष्टंवेदतृणैः। तृणेभ्यः
पुरस्तात्तृणैःसंश्लिष्टंपूर्णपात्रंनिदध्यात्। अभिमृश्यवाचयेत्। पूर्णमसिपूर्णंमेभूयाःसुपूर्ण
मसिसुपूर्णंमेभूयाःसदसिसन्मेभूयाःसर्वमसिसर्वंमेभूयाअक्षितिरसिमामेक्षेष्ठाइति। अभि
मृश्याभिमृशन्नित्यर्थः। तांवाभिमृशंतींवाचयेत्। प्रत्यगाशीष्ट्वान्मंत्रस्य। अथैनांपूर्णपात्रा २८
त्प्रतिदिशमुदकमुदुक्षन्नुदुक्षंतींवाचयति। प्राच्यांदिशिदेवाऋत्विजोमार्जयंतांदक्षिणस्यांदि

मासाःपितरोमार्जयंतांप्रतीच्यांदिशिगृहाःपशवोमार्जयंतामुदीच्यांदिश्यापओषधयोवनस्पतयो
मार्जयंतामूर्ध्वायांदिशियज्ञःसंवत्सरःप्रजापतिर्मार्जयितांमार्जयंतामितिवा। पूर्णपात्रादुदकंगृही
त्वातदुदुक्षन्तींचैवंकुर्वतींवाचयति। अत्रोदुक्षणमकुर्वत्यावाचनेमंत्रलिंगस्यविरोधाभावादुदु
क्षणमपिविधीयते। पूर्ववन्मंत्रलिंगादेव। अभिमर्शनंअकुर्वत्यामंत्रोच्चारणंनसंभवतीतिनतस्या
भिमर्शनंविहितं। मार्जयंतामितिवेतिपदद्वयमात्रविकल्पः। अथास्याउत्तानमंजलिमधस्ताद्यो
क्त्रस्यनिधायात्मनश्चसव्यंपूर्णपात्रंनिनयन्वाचयेन्माहंप्रजांपरासिचंयानःसयावरीस्थन।
समुद्रेवोनिनयानिस्वंपाथोअपीथेति। योक्त्रस्याधस्तात्पत्न्यंजलिमुत्तानमात्मनश्चसव्यंपाणि
मुत्तानंनिधायपूर्णपात्रंनिनयन्माहंप्रजामितितांवाचयेत्। यथातन्निनीयमानमुदकंहस्तेष्वे
वपतेत्तथानिनयेत्। प्राङ्मुखत्वमत्रनाद्रियतेअधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात्।
अत्रपत्नीद्वित्वेबहुत्वेवासर्वासामासांवाचनंकर्तव्यंप्रतिपत्नियोक्त्रविमोचनमावर्तते सर्वासांयो
क्त्राणांद्विगुणीकृत्यनिधानंभवति। निनयनेनसर्वासांस्वयोक्त्रसंस्पृष्टोदकलाभापादुक्षणेपिस
र्वासामन्वयः। वाचनेवाच्यमंत्रलिंगजनितकार्याभावेपिवाच्यस्यपुरुषस्यैवायंसंस्कारइत्यवगंतव्यं।

श्रौ॰ सू॰ म एतेषां पत्नीसंबंधाः पदार्थास्ते सर्वे परस्परसंबंधाः। अथशब्देन तच्छब्देनान्येन वा अतस्ते सर्वे सह
२८ वकर्तव्याः। नैके कुशाः। वेदस्तृणान्यग्रे गृहीत्वा विधून्वन्संततं स्तृणन्नन्येन गार्हपत्यादाहवनीयम
न्ततं तुं तन्तु तन्वन्रजसो भानुमन्विहीति। वेदबंधस्य शुल्कत्वात्तृणानि। त्युच्यंते ते तानि दक्षिणेन हस्तेनाग्र
प्रदेशे गृहीत्वा अविधून्वन् विघृक्के नाकंपयन् गार्हपत्यादारभ्य सव्येन हस्तेन संततं स्तृणन्नाहव
नीयं गच्छति। तंतुं तन्वन्निति स्तरणमंत्रः। न गमनमंत्रः। ततो मंत्रांते स्तरणारंभः। शेषं निधाय प्रत्य
गुदगाहवनीयादवस्थाय स्थाल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात् स्वाहाकारांते मंत्रेण चेयं
त्रे पठितः। शेषं निधायेति वचनात्तानि न सर्वाणि स्तरणे तृणानि नियमेन शेषयितव्यानीति गम्यते।
आज्यस्थाल्याः स्रुवेणाज्यमादायाहवनीये स्रुवेणो पजुहुयात्। आहवनीयात्प्रत्यगुदगवस्थाय।
सर्वप्रायश्चित्तानीति संज्ञैषां होमानां स्वाहाकारांते मंत्रे मंत्रांते स्वाहाकारं कृत्वेत्यर्थः। न चेन्मंत्रेष
त्र्यक्षपि स्वाहाकारो न पठितः तदंते स्वाहाकारः कर्तव्यः। यत्र क्वापि पठितस्तत्रैव स एव प्रदानार्थो
भवति। यत्किंचात्रो पवीतोयजेदन्यत्रापि। यः कश्चनास्मिं शास्त्रे देवतोद्देशेन द्रव्यत्यागात्मको व्या २८
पारो यागो होमो ऽभ्याधानं बलिहरणादयो वा मंत्रेण साध्यं तत्र सर्वत्र स्वाहाकारः कर्तव्य इति सू

त्रार्थः। अन्यत्रेति वचनं गार्हपत्येऽपि प्रापणार्थं अत्रेति इति वषट्कारसमुच्चयनिवृत्त्यर्थः। एवं २९
एवंभूतो व्यक्त होमाभ्याधानोपस्थानानि च। एवंभावेनामेवंप्रकार आहवनीयात्प्रत्यगुदग्दे
शे स्थित आज्यं स्रुवेणादायाहवनीये इति। एवंप्रकारविशिष्टः कर्तव्य एवंभूत इत्युच्यते। विशेषप
रोयं निर्देशः। अव्यक्तशब्देन अविहितविशेष उच्यते। यत्र होमाभ्याधानोपस्थानानि अविहि
तविशेषाणि विधीयंते तत्रानेन प्रकारेण कर्तव्यानीत्यर्थः। एकदेशविशेषेवाप्यपेक्षितमा
त्रमस्माद्गृह्यते॥ अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि। अयसावयसा कृतो
यासन्हव्यमूहिषे या नो धेहि भेषजं स्वाहा। अतो देवा अवंतु न इति द्वाभ्यां व्याहृतिभिश्च भूः
स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति। एकमंत्राणि कर्माणीति न्यायेन द्वाभ्यां द्वे आ
हुती होतव्ये। व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठितेन ज्ञायते व्याहृत्युपदेशेनेन क्रमेण
ते चत्वार इति॥ कृत्वा संस्थाजपं नोपस्थाय तीर्थेन निष्क्रम्यानियमः। स्यादिति शेषः। कृत्वेति वच
नं संस्थाजपेन होमस्य संबंधार्थं। यत्र संस्थाजपोस्ति तत्र प्रायश्चित्तहोमो भिभवतीति। अतः। रवंडे

श्रौ. सू. ऽच्छिद्य विसंस्थाजपस्य प्रयोज्यत्वात् प्रायश्चित्तहोमोपि प्रयोज्य एव । उपस्थायांसेतीर्थेन निष्क्रामे
२० त् । निष्क्रम्यानियमइत्यर्थः लुप्तानियमा इत्यर्थः । अर्थलुप्तत्वे सत्यप्यनियमविधानं कर्ममध्ये वि
तीर्थेन निष्क्रांतस्याव्यावृत्त्यादयो नियमा न भवंतीति । तेन प्रयोगमध्ये मार्गांतरेण निष्क्रांतस्या
पि नियमा भवंत्येवेति ज्ञापयते ॥ अं त्वमेस्वरं स्वमेय ज्ञोपवतेन मन्त्र । यत्ते न्यूनं तस्मै त उपपन्ने
तिरिक्तं तस्मै ते नम इति संस्थाजपः । अन्वर्थसंज्ञेयं तेनायं सोमे छिद्यते न भवति । इति होतुः । इ
ति शब्देनात्रैतावत्त्वमुच्यते । एतावदेव होतुर्नान्यदिति । होतृग्रहणं होतुरेवैतावत् । आग्नीध्र
स्यान्यदपीति ॥ ११ ॥ अथ ब्रह्मणः । अथशब्दोधिकारार्थः । इदानीं ब्रह्मणो विधयो वक्ष्यं
त इत्यर्थः ॥ होत्राचमनयज्ञोपवीतशौचानि । व्याख्यातानीत्यर्थः । स्नानाचमनादिना शुचिर्भू
त्वा ब्रह्मत्वं करिष्यामीत्यग्रतो विहारं प्रविशन् । प्राङ्मुख आचमनं कुर्यात् किमंगित्याद्य यज्ञोप
वीतग्रहणं पैतृकमानुष्ययोरपि कर्मणोर्यथा दृते यज्ञोपवीत्येव स्यादिति । शौचग्रहणं कृत्व
र्थमपि अशुचित्वसंपाक्षिप्तत्वहिहारार्थं बहिः कर्तव्यमिति । एतच्च प्राप्तं विधीयते । नायमयंती २०

र्थेन विहारं प्रपन्न इति । प्राक्त्वेष्टतास्यन्वेष्यते । यज्ञमना इति कर्माभिमुख्य एव यज्ञमनस्त्वो
पपत्तेः अंकधारणमुपवेशांगतया प्राप्तमदृष्टार्थतापरिहारायैव यावदासनमनुवर्तते । तत्रचे
त्कर्मेत्यस्यापि कर्मसंबंधात् । अध्याहृतैरविशिष्टैव । दक्षिणांगतात्तत्र चेत्कर्मेत्यस्य उत्तरांग
त्वेनाविशेषादस्यापि भवति ॥ नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां च । अन्यतः प्राप्तस्य
ब्रह्मणोयं नियम उच्यते । ध्रुवाणां व्रजतां च पुरुषाणां यानि कर्माणि तेषां दक्षिणतो नित्यो भवे
त् । प्राकृतानामप्राकृतानां च ध्रुवाणां नित्यं दक्षिणात्वं ध्रुवेणैव कर्तुं शक्यत इति ध्रुवेषु ध्रुव ए
व भवेत् । व्रजतां कर्मसु नित्यं दक्षिणात्वाय व्रजन्नेन भवेत् । ध्रुवाणां व्रजतामिति कर्तृविशे
षणं न कर्मणां । नित्यत्वमत्रोपक्रमप्रभृत्यापरिसमाप्तेर्दक्षिणत्वमित्यर्थः । चाशब्दः समुच्चया
र्थः । क्वचित्कर्मणि कश्चित्तिष्ठति कश्चिद्व्रजति तत्र भूयसां धर्मः परिगृह्यते । बहिर्वेद्यां दि
३० शं व्रजेयुः सैव तत्र प्राची । यत्र बहिर्वेदि वसतीवरीग्रहणादि कर्तुं यां दिशमभिमुखा व्रजंति
ऋत्विजः तत्र तामेव दिशं प्राचीं कृत्वा दक्षिणतो भवेत् । सैव तत्र प्राचीति वचनात् । बहिरिति वा

श्रौ०१ मभिमुखएवआग्नीध्रो भवेत्। चेष्टास्वमंत्रासुस्थानासनयोर्विकल्पः। अमंत्रेषुकर्मसुस्थानमा
३० सनंवाभवेत्। वाशब्देनैवविकल्पेसिद्धेविकल्पवचनमप्यवस्थाभाविकल्पसिध्यर्थंतेने
कस्मिन्नपिप्रयोगेक्वचिदासनंक्वचित्स्थानमितिलभ्यते॥तिष्ठद्धोमाश्वषट्काराः। तिष्ठ
तांयेहोमावषट्काररहिताश्वतेषुस्थानमासनंवाभवेत्। आसीतान्यत्र। अन्यत्रेत्यनंतर
सूत्रद्वयविषयादन्यत्रेत्यर्थः। समस्तपाण्यंगुष्ठोग्रेणाहवनीयंपरीत्यदक्षिणतःकुशेषूपवि
शेत्। समस्तोपाणीअंगुष्ठौचयस्यसोयंसमस्तपाण्यंगुष्ठः। सव्येनपाणिनादक्षिणंपाणित
लप्रदेशंगृह्णीयात्। दक्षिणेनसव्यांगुष्ठं एवंकृतेपाणीअंगुष्ठौचसमस्तौभवतः। एवंभूतोग्रे
णाहवनीयंपरीत्यतस्यदक्षिणतःकुशेषूपविशेत्। निरसनंकृत्वा। कुशग्रहणान्नसतिसंभवे
तएवासनेप्रकल्प्यंते। दक्षिणतइतिपुनर्वचनमाहवनीयस्यैवदक्षिणतोनक्रियमाणस्यक
र्मणइत्येवमर्थं॥ बृहस्पतिर्ब्रह्माब्रह्मसदनआशिष्यते बृहस्पतेयज्ञंगोपायेत्युपविश्यजपेत्।
उपविश्यग्रहणंसकृदुपविश्यपुनरपिकर्मणएवदक्षिणतोनभवेत्। आसमाप्तेस्तत्रोपविशे ३०

दिति। एषब्रह्मजपःसर्वयज्ञतंत्रेषुसाग्नेर्यत्रोपवेशनं। एषमंत्रोब्रह्मजपसंज्ञोभवतिसचा
तिदेशमनपेक्ष्यसर्वेषुयज्ञेषुभवति। तंत्रग्रहणंपाकयज्ञेष्वपिप्राप्त्यर्थं। पाकयज्ञानामेतत्तं
त्रमितितंत्रशब्दत्वान्तेषामिति। साग्नेर्यत्रोपवेशनमित्यग्निप्रणयनेनसाग्नित्वंकर्मणःप्रति
पन्नेयत्रोपवेशनंविहितंतत्रायंजपोभवति। एतदुक्तंभवति। एषजपःसर्वेषुयज्ञेषुप्रविष्टमा
त्रेभवेत्। अग्निप्रणयनांतएवभवति। उपविष्टमतिसर्जयेत्। अनुज्ञाज्ञानार्थंमंत्रेणामंत्रय
तेअध्वर्युरित्यर्थः। उपविष्टग्रहणंप्रवेशकालज्ञापनार्थं। यस्मिन्कालेप्रवेशस्योपवेशनानं
तरमध्वर्युणातिसर्जनंसंभवतितस्मिन्कालेप्रविशेदित्यर्थः। ब्रह्मन्नपःप्रणेष्यामीतिब्रू
त्वाभूर्भुवःस्वर्बृहस्पतिप्रसूतइतिजपित्वोंप्रणयेत्यतिसृजेत्सर्वत्र। अध्वर्युमंत्रपाठोपश्रा
व्यसहितेपिअनुज्ञावचने। ॐप्रणयेत्येवानुजानीयान्नापःप्रणयेत्येवं। ब्रूहीतिवचनंब्रू
त्वापश्चान्नपेन्मृतेहेति। जपित्वेतिपूर्वस्योपांशुत्वायोत्तरस्यचतंत्रस्वरत्वाय। अतिसृजेद
नुजानीयात्। सर्वत्रेतिसर्वेष्वनुज्ञावचनेषुअस्यविधेःप्रापणार्थं॥ यथाकर्मत्वादेशाः। प्रा

श्रौ॰ सू॰ तस्यायं विशेषविधिः। यस्मै कर्मणेऽनुज्ञामिच्छेत्तद्देवानुज्ञानीयान्न प्रणयेत्येव। यथाकर्म
२१ कर्मानुरूपमादेशाः कर्तव्या इत्यर्थः। प्रणवाद्यूर्ध्वैः। इदं उत्तरविवक्षार्थं। ऊर्ध्वं वा प्रणवाद्। ऊर्ध्वे
भवतीत्यर्थः। अत ऊर्ध्वं वाग्यत आस्त आह विष्णुतऽ उद्वासनात्। प्रणीताप्रणयनोपलक्षिता
त्कालादूर्ध्वमा हविष्कृन्मंत्रोच्चारणाद्वाग्यतो भवति। आस्त इति वचनं अमंत्रेष्वपि कर्मस्वस्मि
न्नवसरे आसनमेवेति नियमार्थं। आमार्जनात्पशौ। पशावग्निप्रणयनमारभ्य आवात्या
लमार्जनात् वाग्यतो भवेत्। सोमे घर्मादिश्वाति प्रैषाद्विवासु ब्रह्मण्यायाः। घर्ममारभ्याति प्रे
षं वारभ्यासु ब्रह्मण्यायावाङ्नियमः। सोमग्रहणं पश्वधिकारात्। पशूनामक एव सोमस्यादि
तितानिवर्त्यं सर्वसोमेषु प्रापणार्थं। प्रातरनुवाकांतर्यामात्। प्रातरनुवाकलक्षितात्कालात्
ऊर्ध्वं आ अंतर्यामग्रहयागात्। हविर्वतोऽनुसवनमिळायाः। तथा सवनत्रयेऽपि पुरोळाशप्रचा
रमारभ्य आ पुरोळाशेळायाः। स्तोत्रे धृतिसर्जनाद्यावषट्कारात्। स्तोत्राद्दौ स्तुधमितिउ २१
पाकरणं। तदादि आशस्त्रयाज्यावषट्कारानुमंत्रणात्। औद्गत्रः पवमानेषु। पवमानस्तो

त्रेषूपाकरणादारभ्य आ उद्गृचः। उद्गृगिति समाप्तिरुच्यते। यद्युक्तिं चमंत्रवत्। सर्वत्र मंत्रवति कर्म
णि वाग्यमनं भवति। होत्राशोवः। उक्तादन्यो यो विषयस्तत्राप्यस्य वाग्यमनं होतृतुल्यं भवति।
अतो वाग्यमननिमित्यादिर्नियमोऽस्याप्यधिक्रियते इत्यर्थः। आपत्तिश्च। आपद्यातो देवा अवंतु
न इति जपे इत्युक्तत्वादेतत्प्रायश्चित्तमापत्तिरित्युच्यते। अनंतरोक्तैर्नवभिः सूत्रैर्विहितस्य
वाग्यमनस्य भ्रेष एतदेव प्रायश्चित्तमित्यर्थः। अन्यत्रैव भूरित्याद्युः। यत्र त्वग्निः प्रणीयते विस
सोमे तदादि तत्र वाग्यमनं। विहित एव वाग्यमने तदादित्यमात्र मंत्रविधीयते तु शाखसमन्वयात्।
अपि ससोमे सोमसहितेऽपि अग्नीषोमीयप्रणयनेऽपीत्यर्थः। तत्र वचनं यस्मिन्नहन्यग्निः प्रणी
यते तस्मिन्नेवाहनि कर्मप्रवृत्तेति तदादि वाग्यमनं न पूर्वेद्युः प्रणयने तदादित्वा नियमः। तथा ह्य
सद्यस्कालेषु पूर्वेद्युः प्रणीयते वरुणप्रघासादिषु। दक्षिणातश्च व्रजं जपत्याशुः शिशानइति
सूक्तं। सूक्तग्रहणं व्रजं जपतीति व्रजतो जपविधानात्। व्रजनसमाप्तावपि कृत्स्नसूक्तप्रयोग
विधानार्थं। दक्षिणतो व्रजनविधानं दक्षिणतो व्रजत एवायं जपः स्यान्नाग्निं सोमं वा प्रणयतस्त

श्रौ॰सू॰ दाहुत्रेणगच्छतीति। समाप्योपवेशनाद्युक्तं। समाप्येतिवचनसमाप्योपवेशनादियदुक्तंतदेवकु
३२ र्यान्निसृष्टकाहृत्स्निंगमनापरिसमाप्तावपीति। आदिशब्देनब्रह्मजपः परिगृह्यते। उपवेशनतृ
णेनिरसनमपिगृह्यते सहचारित्वात् एतत्त्रयमग्निप्रणयनाग्नीषोमप्रणयनयोरंतेविधी
यतेऽनेनसूत्रेण। साग्नौयत्रोपवेशनमित्यनेनसाग्निप्रणयनेषुपश्वादिषुकर्मसुअग्निप्रण
यनांतएवब्रह्मजपोनान्यत्रेतिनियम्यते। नतुसौमिकेप्रणयनेब्रह्मजपः। सोमेयदग्निप्रणाय
नंतदंतेनब्रह्मजपोभवति। तत्रनिरसनोपवेशनेएवभवतः। अन्यत्रविसृष्टवागबद्धभाषीयत
मनाः। यतमनाः क्रियमाणपदार्थपरामर्शीविशिष्टवागपियतमनाःस्यादितियोगविभागःकृतः।
विपर्यासंतरितिमंत्रेकर्मणिचाख्यातेवोपलक्ष्यवाज्ञान्वाभ्याकृतिंजुहुयात्। विपर्यासोव्युत्क्रमः।
अंतरायोतिगमनंमंत्रयोः कर्मणोर्वा विपर्यासंतरितिमंत्रेकर्मणिस्वयमुपलक्ष्यपरेणवाख्यातेद
क्षिणंजानुनिपात्यवक्ष्यमाणेनमंत्रेणवक्ष्यमाणेनवाकृतींजुहुयात्। सर्वत्रजानुनिपातमुपकृ
ष्योत्तानत्वाविरोधेनकर्तव्यं। त्र्यग्भावेकेनविदृष्टकारणयांच्यादिदेषनिबंधनात्। आख्याता ३२

पलक्षणग्रहणमन्यस्मिन्नपिविषयथाकथंचित्ज्ञातेएतत्प्रायश्चित्तंभवतीत्येवमर्थं। तेनैवम
स्यसूत्रस्यार्थोविगंतव्यः। सर्वेषुविषयेषुएतत्प्रायश्चित्तंसामान्यरूपेणभवति। यदन्यत्कर्मविशेषे
विहितंतदस्यापवादकंभवति। विपर्यासांतरितयोरत्रभेदनग्रहणाद्विषयेविशेषेणाप्युक्तस्यसमु
च्चयोभवति। सर्वेषांनैमित्तिकानामयमुत्सर्गः निमित्तादनंतरंकर्तव्यमितियस्यपुनर्बलवता
प्रमाणेनानंतरंकर्तुमसंभवतितस्ययावत्संभवमुत्कर्षेनात्यंतमिति। वाशब्दस्याहुकृत्यादिकारण
ज्ञातएवनिमित्तेएतत्प्रायश्चित्तंनपूर्वोक्तिसर्वप्रायश्चित्तवदज्ञातेपीतिज्ञापनार्थं। आकृति
मित्येकवचनंबहुष्वपिनिमित्तेषुयुगपत्ज्ञातेष्वेकैवाकृतिःकर्तव्यानप्रतिनिमित्तमितिज्ञापना
य। सत्कर्म्भिर्भूरितिगार्हपत्ये। यजुष्टोभुवइतिदक्षिणे। आग्नीध्रीयेसोमेषु। प्रागाग्नीध्रीय
प्रणयनात्सोमेपिदक्षिणाग्नावेव। अन्वार्थत्वादाग्नीध्रप्रणयनस्य। सामतः स्वरित्याहवनीये
सर्वतोविज्ञातेवाभूर्भुवः स्वरित्याहवनीयएव। यदासर्वेभ्योदेवेभ्योयुगपच्छेषाआगच्छेयुः। तदा
समस्ताभिरेवाकृतिराहवनीयएवकार्याएवकारग्रहणंसमस्ताभिरेवाकृतीराहवनीयएवेति

श्रौ·सू· ज्ञापनार्थं। अविज्ञातइतिस्मार्तानांशोधनमनादीनांश्रेयस्यज्ञापनार्थं। एतेऽरुगादयःशब्दावेदव
३२ चनानजातिवचनाः। प्राक्प्रयाजेभ्योऽगारंबहिष्परिधिनिर्हृत्तंस्फ्यदंडेनाभिनिदध्यान्मातपोमा
यज्ञस्तपन्मायज्ञपतिस्तपत्। नमस्ते अस्त्वायतेनमोरुद्रपरायतेनमोयत्रनिषीदसीति। प्राक्प्रया
जेभ्यइतिस्फ्यगादापनात्प्राक्कृत्स्नंसंगृह्यते। बहिःपरिधीत्यस्यपरिधिशब्दस्यदेशोपलक्षणार्थ
त्वात्सर्वतोनिर्वृत्तंगृह्यतेतत्रवक्ष्यमाणैःमंत्रैःस्पृशति। अमुंमाहिंसीरमुंमाहिंसीरितिप्रति
दिशमध्वर्युयजमानौपुरस्ताद्ब्रह्मयजमानौदक्षिणतोहोतृपत्नीयजमानान्पश्चादाग्नीध्र
यजमानावुत्तरतः। अध्वर्युंमाहिंसीर्यजमानंमाहिंसीरित्येवमंतेनमात्रपदत्वेनेनपुरस्तान्नि
गतमभिनिदध्यात्। एवमुत्तरेष्वपिप्रयोगोद्रष्टव्यः। चशब्दोनुमादेःपूर्वेणसमुच्चयार्थः। दिग
नुक्रमणेनप्रतिदिशंशब्दार्थसिद्ध्येयत्प्रतिदिशग्रहणंकरोतितज्ज्ञापयतिय। सर्वदिक्
संबद्धंकर्मानेनक्रमेणकर्तव्यमिति। अथैनमनुप्रहरेद्दाहंयज्ञंदधानिर्ऋतेरुपस्थात्तंदेवेषुप
रिदधामिविद्वान्। सुप्रजास्त्वंशतहिमामदंतहनोदेवामविशर्मयक्षेति। नस्वाहाकारः। ३२

तमभिजुहुयात्सहस्रशृंगोवृषभोजातवेदास्तोमपृष्ठोघृतवान्सुप्रतीकः। मानोहिंसीज्जिहिं
सितोनेत्वाजहामिगोपोषंचनोवीरपोषंचयच्छस्वाहेति। तमितिप्रहृतमेवांगारमभिजुहुयादित्यर्थः
॥१२॥ प्राशित्रमाह्रियमाणमीक्षतेमित्रस्यत्वाचक्षुषाप्रतीक्षइति। देवस्यत्वासवितुःप्रसवेश्वि
नोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीति। तदंजलिनाप्रतिगृह्य पृथिव्यास्त्वानाभौसाद
याम्यदित्याउपस्थइति। कुशेषुप्रागग्रंदंडंनिधायांगुष्ठोपकनिष्ठिकाभ्यामसंखादन्प्राश्नीयात्। अ
ग्नेष्ट्वास्येनप्राश्नामिबृहस्पतेर्मुखेनेति। आचम्याचामेत्सत्येनत्वाभिजिघर्मियाअप्स्वंत
र्देवतास्त्वाइदंशमयंतुचक्षुःश्रोत्रंप्राणान्मेमाहिंसीरिति। इन्द्रस्यत्वाजठरेदधामीतिनाभिमाल
भेत। प्रक्षाल्यप्राशित्रहरणंत्रिरनेनाभ्यात्ममपेननिनयेत। तदित्याह तस्यप्रतिग्रहणार्थेना
क्रियमाणस्येति। अंतर्वेदिकुशेषुप्रागग्रंदंडंप्राशित्रहरणंनिधायासंखादन्प्राश्नीयात्। असंखाद
न्दन्तैरपीड्यन्नित्यर्थः। शेषंवर्ष्मिमात्रमनंकृत्वापश्चान्मंत्रेणापःपिबेत्पुनरपिप्राग्वदृशोना
र्थमानमनंकुर्यात्। अनेनप्रक्षालितेनप्राशित्रहरणेनात्मानमभिमुखेनहस्तेनचतथाभूते

नात्मनः पुरतस्त्रिरपः सिंचेत्। मार्जयित्वास्मिन्ब्रह्मभागं निदध्यात्। सेर्वैः कर्तृभिस्तैरिडाभक्ष
णस्यानुष्ठेयत्वात्तदंगत्वाच्च मार्जनस्यास्मिन्नवसरे अयमपीडांभक्षयित्वा मार्जनं कर्तव्यं ततः
पश्चाद्ब्रह्मवर्धाकरणे कृते ब्रह्मण आनीतं ब्रह्मभागं प्राशित्रहरणे निदध्यादित्यर्थः। पश्चात्कुशेषु य
जमानभागं। यस्मिन्देशे प्राशित्रहरणं निहितं तस्य पश्चात्कुशेषु यजमानभागं निदध्यात्। न
प्राशित्रहरण इत्यर्थः। अन्वाहार्यमवेक्षेत प्रजापतेर्भागोस्यूर्जस्वान्पयस्वान्क्षितिरसि मा मे
क्षेष्ठा अस्मिंश्च लोके मुष्मिंश्च। इति कार्याध्याहारेण सूत्रच्छेदः। प्राणापानौ मे पाहि कामा
यत्वेत्यस्पृशन्नवघ्रायांगुष्ठोपकनिष्ठिकाभ्यां शिष्टं गृहीत्वा ब्रह्मभागे निदध्यात्। अन्येनांगे
नास्पृशन्नेवाजिघ्रेत्। अन्वाहार्यं प्राणापानावित्यादिना। शिष्टं विशिष्टं पुलाकमात्रमित्य
र्थः। तन्मात्रमन्वाहार्याद्गृहीत्वा ब्रह्मणो भागे निदध्यात्। ब्रह्मन्प्रस्थास्याम इति प्रोक्ता बृ
हस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्ट बृहस्पते यज्ञं मे जुगुपः स यज्ञं पाहि स यज्ञपतिं पाहि स मां
पाहि भूर्भुवः स्वर्बृहस्पतिप्रसूत इति प्रोक्तोम्प्रतिष्ठेति समिधमनुजानीयात्। अध्वर्युमंत्र

पाठः प्रस्थास्यामः प्रस्थास्यामी तिवा प्रोक्त्वा विप्रतिष्ठेत्येवानुज्ञावचनं ब्रूयादित्येवमर्थः। भूर्भु
वः स्वरित्यादेः पाठः समुच्चयार्थः। समिद्ग्रहणं समिदाधानानुज्ञानमपि समप्रतिष्ठेत्येवं रूपमेव
भवति नाधेहीत्येवं रूपमित्येवमर्थः। संस्थिते जघन्यकर्त्विजां सर्वप्रायश्चित्तानि जुहुयात्। ऋ
त्विजां कर्मसु संस्थितेषूपरतेषु अनुपरते यजमानकर्मणि जघन्यः सर्वप्रायश्चित्तानि जुहुया
त्। तमितरेन्वालभेरन्। अत्राग्नीध्रोप्यन्वारभेत ब्रह्माणं। बहुवचनं विकल्पार्थं। होतारं वा।
होतारं वेतरेन्वारभेरन्। एतयोर्नित्यो होमः। होमश्चैतयोः कार्यो नान्वारंभः परस्परमि
त्यर्थः। सर्वसंस्था जपेनोपतिष्ठंत उपतिष्ठंते। सर्वे होमकर्तारो न्वारंभकर्तारश्चेत्यर्थः॥ ॥
॥
॥१३॥ ॥इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां प्रथमोध्यायः॥
पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः प्रथमेध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यंतसहितौ
उत्तरत्रेष्टयः पशवश्च वक्ष्यंते विध्यंतरविहिताः। तेषां विध्यंतापेक्षा यथाहनहितकरणं लोके

श्रौ. वृ.

३५ वेदे वा किंविदीदृशं ॥ इतिकर्तव्यतासाध्येयस्य नानुग्रहेयैतितेएकंवनदपेक्षायांसत्यांतदपिवै
दिकमेवश्रौतमेवेत्यपिसिद्धं श्रौतेषु चाग्निहोत्रिकदर्शपौर्णमासकसौमिकेषुमध्यस्येदम
स्येमितिविध्येविशेषग्रहणेचोदनासामान्यस्वरूपसामान्यंचमुख्यान्यस्याविशेषलिंग
स्याभावान्नैवविशेषाल्लिंगोर्विध्यंतविशेषःपरिगृह्यते। तानीमानिविध्यंतरविशेषग्रहण
लिंगानि। निर्वपेत्ताद्धुतश्च। व्यमोषधत्वंपयोदधिकपालानिवनत्संख्या। देवताशब्द एव च।
तस्मिन्नक्षरसंख्यादेवतद्धान्ये येकबर्ह्यपिद्रव्यत्वेत्र। कृतःशब्दो हविषः प्रभवादिव। एत
द्वात्रणशाद्वश्चतद्धदित्युपदेशनं। नामधेयंतथाव्यक्तचोदनाचान्यदीदृशं। लिंगान्येता
निवान्यानिगुरूणिचलघूनिच। समीक्ष्यप्रकृतिश्चैषांविकृतिश्चेतिकल्पना। द्रव्येदेवत
तयोर्यत्रविरोधस्तत्रनिश्चये। तत्रद्रव्यंबलीयस्याद्देवतायाइतिस्थितिः। तत्रसर्वासामिष्टी
नांदर्शपूर्णमासौप्रकृतीतत्रविशेषलिंगोक्तासांवृद्दर्शः प्रकृतिः। कासांचित्पौर्णमासी ३५
त्येवंसमीक्ष्यव्यवस्थाकल्पनीया। एवंसर्वेषांपशूनांदर्शपूर्णमासावेवप्रकृती। तद्धितादिविशे